**Each directory should have a file called README bib.txt. with bibliographic entry with following details:-**

| | | | |
|---|---|---|---|
| **i.** | Discipline | : | **Sahitya** |
| **ii.** | Name of the text | : | **Kavyalankara** |
| **iii.** | Author | : | **Rudrata** |

**File named "README_type_log.txt" containing the following details:-**

| | | | |
|---|---|---|---|
| **i.** | Name of the institute | : | **Jaipur Campus** |
| **ii.** | (a) Principal Investigator | : | **Prof. Radhavallabh Tripathi** |
| | (b) Investigator | : | **Prof. R. Devnathan** |
| | (c) Co-investigator | : | **Dr. Shukla Mukherjee** |
| | (d) Editor | : | **Dr. Umakant Chaturvedi** |
| **iii.** | Name of the typist | : | **Rajesh Kumar Sharma** |
| **iv.** | Completion date of data entry | : | **23.12.2009** |
| **v.** | Name of the proof reader | : | **Dr. Umakant Chaturvedi** |
| **vi.** | Completion date of proof reading | : | **10.12.2009** |
| **vii.** | Name of the approval authority | : | **Prof. Arknath Chaudhary,** Principal, Rashtriya Sanskrit Sansthan, Jaipur Campus, Jaipur |
| **viii.** | Date of approval | | **22.03.2010** |

# श्रीरूद्रटप्रणीतः

# काव्यालङ्कारः

# काव्यालङ्कारः

## प्रथमोऽध्यायः 1-3 पृ.

1. मङ्गलाचरणम्
2. ग्रन्थप्रयोजनम्
3. काव्यप्रयोजनम्
4. काव्यकारणम्

## द्वितीयोऽध्यायः 4-7 पृ.

1. काव्यलक्षणम्
2. शब्दलक्षणम्
3. शब्दस्य पञ्च भेदाः
4. वृत्ते द्वैविध्यम्
5. तिस्रो रीतयः
6. वाक्यं तस्य गुणाः भेदाश्च
7. शब्दालङ्कारभेदाः, श्लेषवक्रोक्तिः, काकुवक्रोक्तिः, अनुप्रासः, तस्य भेदाः, मधुरा-प्रौढा-परुषा-ललिताभद्रेति पञ्चवृत्तयः।

## तृतीऽध्यायः 8-14 पृ.

1. यमकस्य लक्षणम्
2. यमकस्य प्रकारा उदाहरणानि च,

## चतुर्थोऽध्यायः 15-18 पृ.

1. श्लेषस्य लक्षणम्
2. श्लेषस्य भेदा उदाहरणानि च

## पञ्चमोऽध्यायः 19-23 पृ.

1. चित्रालङ्कारस्य लक्षणम्
2. चित्रालङ्कारस्य, चक्रखड्गबन्धादयो भेदा उदाहरणानि च।

## षष्ठोऽध्यायः 24-29 पृ.

1. शब्ददोषभेदौ - पददोषः, वाक्यदोषः
2. पददोषस्य भेदा उदाहरणानि च
3. वाक्यदोषस्य भेदा उदाहरणानि च

## सप्तमोऽध्यायः 30-42 पृ.

**1.** अर्थलक्षणम्
**2.** अर्थभेदाः
**3.** अर्थालङ्कारवर्गीकरणम्
**4.** वास्तवाऽर्थाऽलङ्काराणां सहोक्त्याद्यानामेकावल्यन्तानां लक्षणान्युदाहरणानि च।

## अष्टमोऽध्यायः 43-54 पृ

1. औपम्यलक्षणम्

2. औपम्यमूलानामुपमाद्यानां स्मरणान्तानामर्थालङ्काराणां लक्षणमुदाहरणं च

**नवमोऽध्यायः 55-60 पृ**

1. अतिशयस्य लक्षणम्

2. अतिशयगर्भाणां पूर्वाद्यानामहेतुपर्यन्तनामर्थालङ्काराणां लक्षणमुदाहरणं च।

**दशमोऽध्यायः 61-64 पृ**

1. अर्थश्लेषस्य लक्षणम्

2. अर्थश्लेषस्याविशेषश्लेषादयो भेदाः, लक्षणानि, उदाहरणानि च

3. अलङ्कराणां संकीर्णता

**एकादशोऽध्यायः 65-68 पृ**

1. अर्थदोषस्य भेदाः

2. अर्थदोषभेदानां लक्षणान्युदाहरणानि च।

**द्वादशोऽध्यायः 69-74 पृ**

1. काव्ये रसस्य अनिवार्यता

2. रसभेदाः

3. रसलक्षणम्

4. शृङ्गारस्य भेदौ

5. नायकस्य नायिकायाश्च भेदाः, नायकसहायाश्च

## त्रयोदशोऽध्यायः 75-76 पृ

1. संभोगशृङ्गारस्य लक्षणम्
2. नायिकास्वभावः
3. अनुरक्तनायिकाचेष्टाः
4. नायकशिक्षा

## चतुर्दशोऽध्यायः 77-81 पृ

1. विप्रलम्भशृङ्गारस्य चत्वारो भेदा लक्षणानि च
2. प्रथमानुरागविप्रलम्भे दश कामदशाः
3. शृङ्गाराभासः

## पञ्चदशोऽध्यायः 82-84 पृ

1. वीरादिप्रेयोऽन्तानां रसानां लक्षणानि
2. शृङ्गारेतररसेषु रीतिप्रयोगव्यवस्था

## षोडशोऽध्यायः 85-92 पृ

1. काव्ये चतुर्वर्गस्य सरसनिवेशस्यानुज्ञा
2. काव्यकथाख्यायिकादीनां प्रबन्धानामुत्पाद्याऽनुत्पाद्यवस्तुत्वेन द्वैविध्यम्।
3. काव्यकथाख्यायिकादीनां प्रबन्धानां महत्त्वेन लघुत्वेन च द्वैविध्यम्।
4. महाप्रबन्धस्य लक्षणम्
5. लघुप्रबन्धस्य लक्षणम्
6. प्रबन्धनिर्माणविधयः

7. सर्वत्र औचित्यरक्षणस्याऽनुज्ञा

8. ग्रन्थान्तमङ्गलाचरणम्

श्रीरूद्रटप्रणीतः

# काव्यालङ्कारः।

## प्रथमोऽध्यायः

अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः।
उद्भिन्ननवश्मश्रुश्रेणिरिव गणाधिपो जयति॥ १॥

सकलजगदेकशरणं प्रणम्य चरणाम्बुद्वयं गौर्याः।
काव्यालङ्कारोऽयं ग्रन्थः क्रियते यथायुक्ति ॥ २॥

अस्य हि पौर्वापर्यं पर्यालोच्याचिरेण निपुणस्य।
काव्यमलङ्कर्तुमलं कर्तुरुदारा मतिर्भवति ॥३॥

ज्वलदुज्ज्वलवाक्प्रसरः सरसं कुर्वन्महाकविः काव्यम्।
स्फुटमाकल्पमनल्पं प्रतनोति यशः परस्यापि ॥ ४॥

तत्कारितसुरसदनप्रभृतिनि नष्टे तथाहि कालेन।
न भवेन्नामापि ततो यदि न स्युः सुकवयो राज्ञाम् ॥५॥

इत्थं स्थास्नु गरीयो विमलमलं सकललोककमनीयम्।
यो यस्य यशस्तनुते तेन कथं तस्य नोपकृतम् ॥ ६॥

अन्योपकारकरणं धर्माय महीयसे च भवतीति ।
अधिगतपरमार्थानामविवादो वादिनामत्र ॥ ७॥

अर्थमनर्थोपशमं सममसममथवा मतं यदेवास्य ।
विरचितरुचिरसुरस्तुतिरखिलं लभते तदेव कविः ॥८॥

नुत्वा तथाहि दुर्गां केचित्तीर्णा दुरुत्तरां विपदम्।
अपरे रोगविमुक्तिं वरमन्ये लेभिरेऽभिमतम्॥९॥

आसाद्यते स्म सद्यः स्तुतिभिर्येभ्योऽभिवाञ्छितं कविभिः ।
अद्यापि त एव सुरा यदि नाम नराधिपा अन्ये ॥१०॥

कियदथवा वच्मि यतो गुरुगुणमणिसागरस्य काव्यस्य ।
कः खलु निखिलं कलयत्यलमलघुयशोनिदानस्य ॥११॥

तदिति पुरुषार्थसिद्धिं साधु विधास्यद्भिरविकलां कुशलैः।
अधिगतसकलज्ञेयैः कर्तव्यं काव्यममलमलम् ॥ १२ ॥

फलमिदमेव हि विदुषां शुचिपदवाक्यप्रमाणशास्त्रेभ्यः।
यत्संस्कारो वाचां वाचश्च सुचारुकाव्यफलाः ॥ १३॥

तस्यासारनिरासात्सारग्रहणाच्च चारुणः करणे।
त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः॥१४॥

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥१५॥

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति।

पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा ॥१६॥

स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम्।
उत्पाद्या तु कथंचि  व्युत्पत्त्या जन्यते परया ॥१७॥

छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात्।
युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन ॥१८॥

विस्तरतस्तु किमन्यत्तत इह वाच्यं न वाचकं लोके।
न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा ॥१९॥

अधिगतसकलज्ञेयः सुकवेः सुजनस्य संनिधौ नियतम्।
नक्तंदिनमभ्यस्येदभियुक्तः शक्तिमान्काव्यम्॥२०॥

स्फारस्फुरदुरुमहिमा हिमधवलं सकललोककमनीयम्।
कल्पान्तस्थायि यशः प्राप्नोति महाकविः काव्यात्॥२१॥

अमरसदनादिभ्यो भूता न कीर्तिरनश्वरी
भवति यदसौ संवृद्धापि प्रणश्यति तत्क्षये।
तदलममलं कर्तुं काव्यं यतेत समाहितो
जगति सकले व्यासादीनां विलोक्य परं यशः॥२२॥

**इति प्रथमोऽध्यायः**

## द्वितीयोऽध्यायः

ननु शब्दार्थौ काव्यं शब्दस्तत्रार्थवाननेकविधः।
वर्णानां समुदायः स च भिन्नः पञ्चधा भवति॥१॥

नामाख्यातनिपाता उपसर्गाश्चेति संमतं येषाम्।
तत्रोक्ता न भवेयुस्तैः कर्मप्रवचनीयास्तु॥२॥

नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन।
वृत्तेः समासवत्यास्त  स्यू रीतयस्तिस्त्रः॥३॥

पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।
लघुमध्यायतविरचनसमासभेदादिमास्तिस्रः॥४॥

द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।
शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥५॥

आख्यातान्युपसर्गैः संसृज्यन्ते कदाचिदर्थाय।
वृत्तेरसमासाया वैदर्भी रीतिरेकैव ॥६॥

वाक्यं तत्राभिमतं परस्परं सव्यपेक्षवृत्तीनाम्।
समुदायः शब्दानामेकपराणामनाकाङ्क्षः ॥७॥

अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारुपदम्।
क्षोदक्षममक्षुणं सुमतिर्वाक्यं प्रयुञ्जीत॥८॥

रचयेत्तमेव शब्दं रचनाया यः करोति चारुत्वम्।

सत्यपि सकलयथोदितपदगुणसाम्येऽभिधानेषु॥९॥

रचनाचारुत्वे खलु शब्दगुणः संनिवेशचारुत्वम्।

तर्वाल्युर्वेवर्षे तरुपङ्क्तिरसंकटैव मुने ॥१०॥

वाक्यं भवति द्वेधा गद्यं छन्दोगतं च भूयोऽपि।

भाषाभेदनिमित्तः षोढा भेदोऽस्य संभवति ॥११॥

प्राकृतसंस्कृतमागधपिशाचभाषाश्च शूरसेनी च।

षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥१२॥

वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्।

शब्दस्यालङ्काराः श्लेषोऽर्थस्यापि सोऽन्यस्तु॥१३॥

वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः।

वचनं यत्पदभङ्गैर्ज्ञेया सा श्लेषवक्रोक्तिः॥१४॥

किं गौरि मां प्रति रुषा ननु गौरहं किं कुप्यामि कां प्रति मयीत्यनुमानतोऽहम्।

जानाम्यतस्त्वमनुमानत एव सत्यमित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥१५

विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशेषतो भवति।

अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥१६॥

शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम्।

धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् ॥१७॥

एकद्वित्रान्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः।

आवर्त्यते निरन्तरमथवा यदसावनुप्रासः॥१८॥

मधुरा प्रौढा परुषा ललिता भद्रेति वृत्तयः पञ्च।

वर्णानां नानात्वादस्येति यथार्थनामफलाः ॥१९॥

निजवर्गान्त्यैर्वर्ग्याः संयुक्ता उपरि सन्ति मधुरायाम्।

तद्युक्तश्च लकारो रणौ च ह्रस्वस्वरान्तरितौ ॥२०॥

तन्न यथाशक्ति रणौ द्विस्त्रिर्वा लकारं च।

पञ्चभ्यो न कदाचिद् वर्ग्यानूर्ध्वं प्रयुञ्जीत॥२१॥

भणतरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।

यदि सल्लीलोल्लापिनि गच्छसि तत्कि त्वदीयं मे॥२२॥

अनुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।

परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥२३॥

अन्त्यटवर्गान्मुक्त्वा वर्ग्ययण उपरि रेफसंयुक्ताः।

कपयुक्तश्च तकारः प्रौढायां कस्तयुक्तश्च॥२४॥

कार्याकार्यमनार्यैरुन्मार्गनिरर्गलैर्गलन्मतिभि.।

नाकर्ण्यते विकर्णैर्युक्तोक्तिभिरुक्तमुक्तमपि॥।२५॥

सर्वैरुपरि सकारः सर्वे रेणोभयत्र संयुक्ताः।

एकत्रापि हकारः परुषायां सर्वथा च शषौ ॥२६॥

लिप्सून्सर्वान्सोऽन्तब्रह्मोद्यैर्ब्राह्मणैर्वृतः पश्यन्।

जिह्वेत्यगर्ह्मबर्हिःशेषशयः कोषशून्यः सन् ॥२७॥

परुषाभिधायिवचनादनुकरणाच्चापरत्र नो परुषाम्।

रचयेदथागतिः स्यात्तत्रापि ह्लादयो हेयाः॥२८॥

ललितायां घधभरसा लघवो लश्चापरैरसंयुक्तः।

परिशिष्टा भद्रायां पृथगथवा श्रव्यसंयुक्ताः॥२९॥

मलयानिलललनोल्ललमदकलकलकण्ठकलकललामः।

मधुरमधुविधुरमधुपो मधुरमधुना धिनोति धराम्॥३०।

उत्कटकरिकरटतटस्फुटपाटनसुपटुकोटिभिः कुटिलैः।

खेलेऽपि न खलु नखैरुल्लिखति हरिः खरैराखुम्॥३१॥

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थम्।

मिश्राः कवीन्द्रैरघनाल्पदीर्घाः कार्या मुहुश्चैव गृहीतमुक्ताः॥३२॥

**इति द्वितीयोऽध्यायः**

## तृतीयोऽध्यायः

तुल्यश्रुतिक्रमाणामन्यार्थानां मिथस्तु वर्णानाम्।
पुनरावृत्तिर्यमकं प्रायश्छन्दांसि विषयोऽस्य॥१॥

पूर्वं द्विभेदमेतत्समस्तपादैकदेशजत्वेन।
पादार्धश्लोकानामावृत्त्या सर्वजं त्रेधा॥२॥

पर्यायेणान्येषामावृत्तानां सहादिपादेन।
मुखसंदंशावृतयः क्रमेण यमकानि जायन्ते॥३॥

चक्रं दहतारं चक्रन्द हतारम्।
ख़ड्गेन तवाजौ राजन्नरिनारी॥४॥

सन्नारीभरणोमायमाराध्य विधुशेखरम्।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय॥५॥

मुदारताडी समराजिराजितः प्रवृद्धतेजाः प्रथमो धनुष्मताम्।
भवान्बिभर्तीह नगश्च मेदिनीमुदारताडीसमराजिराजितः॥६॥

प्रत्येकं पश्चिमयोरावृत्त्या पादयोर्द्वितीयेन।
यमके संजायेते गर्भः संदष्टकं चेति ॥७॥

यो राज्यमासाद्य भवत्यचिन्तः समुद्रतारम्भरतः सदैव।
समुद्रतारम्भरतः स दैवप्रमाणमारभ्य पयस्युदास्ते ॥८॥

इदं च येन स्वयमात्मभोग्यतां समस्तकञ्चीकमनीयताकुलम्।

नितम्बबिम्बं कथमस्तु नो नृणां स मस्तकाञ्ची कमनीयताकुलम्॥९॥

अन्योन्यं पश्चिमयोरावृत्त्या पादयोर्भवेत्पुच्छः।

सर्वैः सार्धं युगपत्प्रथमस्य तु जायते पङ्क्तिः॥१०॥

उत्तुङ्गमातङ्गकुलाकुले यो व्यजेष्ट शत्रून्समरे सदैव।

स सारमानीय महारि चक्रं ससार मानी यमहारिचक्रम् ॥११॥

सभाजनेनोपरि पूरितासौ सभाजने नोपरिपूरितासौ।

सभा जनेनोऽपरिपूरितासौ सभाजने नोऽपरिपूरितासौ॥१२॥

परिवृत्तिर्नाम भवेद्यमकं गर्भावृतिप्रयोगेण ।

मुखपुच्छयोश्च योगाद्युग्मकमिति पादजं नवमम् ॥१३॥

मुदा रतासौ रमणी यता यां स्मरस्यदोऽलं कुरुतेन वोढा ।

स्मरस्यदोऽलंकुरुतेऽनवोढामुदारतासौ रमणीयतायाम् ॥१४॥

विनायमेनो नयतोऽसुखादिना विना यमेनोनयता सुखादिना ।

महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम् ॥१५॥

अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम ।

श्लोकस्तु महायमकं तदेवमेकादशैतानि ॥१६॥

ननाम लोको विदमानवेन मही न चारित्रमुदारधीरम् ।
न नामलोऽकोविदमानवेनमहीनचारित्रमुदारधीरम् ॥१७॥

स त्वारं भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥१८॥

सत्वारम्भरतो वश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥१९॥

पादं द्विधा त्रिधा वा विभज्य तत्रैकदेशजं कुर्यात् ।
आवर्तयेत्तमंशं तत्रान्यत्रापि वा भूयः॥२०॥

आद्यर्धान्यन्योन्यं पादावृत्तिक्रमेण जनयन्ति ।
दश यमकान्यपरस्मिन्परिवृत्त्या तद्वदन्यानि ॥२१॥

एतदुदाहरणानां पादावृत्त्यैव दर्शितो मार्गः ।
इह विंशतिभेदमिदं यमकं नोदाहृतं तेन ॥२२॥

प्रथमतृतीयान्त्यार्धे तदनन्तरभागयोः परावृत्ते।
अन्तादिकमिति यमकं व्यस्तसमस्ते त्रिधा कुरुतः ॥२३॥

नारीणामलसं नाभि लसन्नाभि कदम्बकम्।
परमास्त्रमनङ्गस्य कस्य नो रमयेन्मनः ॥२४॥

पश्यन्ति पथिकाः कामशिखिधूमशिखामिव ।

इमां पद्मालयालीनां लयालीनां महावलीम्॥२५॥

पुष्यन्विलासं नारीणां सन्नारीणां कुलक्षयम्।

आ कल्पं वसुधासार सुधासार जगज्जय ॥२६॥

द्वैतीयमन्यमर्धं परिवृत्तमनन्तरे भवेन्मध्यम्।

मध्यसमस्तान्तादिकयोगादपि जायते वंशः ॥२७॥

समस्तभुवनव्यापियशसस्तरसेहते।

रसेहते प्रियं कर्तुं प्राणैरपि महीपते॥२८॥

ग्रीष्मेण महिमानीतो हिमानीतोयशोभितः ।

यशोऽभितः पर्वतस्य पर्व तस्य हि तन्महत्॥२९॥

आवृत्तं प्रथमादौ द्वितीयमर्धं चतुर्थपादस्य।

वंशश्च चक्रकाख्यं षष्ठं चान्तादिकं यमकम्॥३०॥

सभाजनं समानीय स मानी यः स्फुटन्नपि।

स्फुटं न पिहितं चक्रे हितं चक्रे सभाजनम्॥३१॥

प्रथमादिप्रथमार्धैः परिवृत्तान्यत्र सार्धमर्धानि।

अन्त्यान्यनन्तराणां जनयन्त्याद्यन्तकं नाम॥३२॥

इदमप्यन्तादिवत्क्रमेण षोढैव भिद्यते भूयः।

अस्योदाहरणानां तेनैव च दर्शितो मार्गः॥३३॥

प्रथमतृतीयाद्यर्धे तदनन्तरचरमयोः परावृत्ते।

भवति समस्तान्तादिकयोगादप्यर्धपरिवृत्तिः॥३४॥

ससार साकं दर्पेण कंदर्पेण ससारसा।

शरन्नवाना बिभ्राणा नाविभ्राणा शरं नवा॥३५॥

पादसमुद्गकसंज्ञं तत्रावृत्तानि कुर्वते तच्च।

अन्तरितानन्तरितव्यस्तसमस्तेषु पादेषु॥३६॥

मुदा सेनामुदासेनादसौ तामसमञ्जसम्।

महीनाथमहीनाथ जयश्रीरालिलिंङ्ग तम्॥३७॥

यत्त्वया शात्रवं जन्ये मदायतमदायत।

तेन त्वामनुरक्तेयं रसायत रसायत ॥३८॥

रसासार रसासार विदा रणविदारण।

भवतारम्भवतारं महीयतमहीयत॥३९॥

आवृत्तानि तु तस्मिन्नाद्यर्धान्यर्धशो विभक्तानि।

वक्त्रं तथा शिखान्त्यान्युभयानि च जायते माला॥४०॥

घनाघनाभिनीलानामास्थामास्थाय शाश्वतीम्।

चलाचलापि कमले लीनालीनामिहावली॥४१॥

यासां चिते मानोऽमानो नारीर्भूयोऽरं ता रन्ता।

सारप्रेमा सन्नासन्ना जायेतैवानन्ता नन्ता॥ ४२॥

भीताभीता सन्नासन्ना सेना सेनागत्यागत्या।

धीराधीराह त्वा हत्वा संत्रासं त्रायस्वायस्वा॥४३॥

मध्यान्यर्धार्धानि तु मध्यं कुर्वन्ति तत्र परिवृत्त्या।

आद्यन्तान्याद्यन्तं काञ्चीयमकं तथैकत्र॥४४॥

सन्तोऽवत बत प्राणानिमानिह निहन्ति नः।

सदाजनो जनोऽयं हि बोद्धुं सदसदक्षमः॥४५॥

दीना दूनविषादीना शरापादितभीशरा।

सेना तेन परासे ना रणे पुञ्जीवितेरणे॥४६॥

या मानीतानीतायामा लोकाधीरा धीरालोका।

सेनासन्नासन्ना सेना सारं हत्वाह त्वा सारम्॥४७॥

पादस्त्रिधा विभक्तः सकलस्तस्यादिमध्यपर्यन्ताः।

तेष्वपरत्रावृत्त्या दश दश यमकानि जनयन्ति ॥४८॥

सुमतिरिमानि त्रीण्यपि पादावृत्तिक्रमेण दशकानि।

यमकानां जानीयात्तदुदाहरणानि तद्वच्च॥४९॥

अन्तादिकमिव षोढा विभिन्नमेतत्करोति तावन्ति।

यमकान्याद्यन्तकवत्तथापरामर्धपरिवृत्तिम् ॥५०॥

तद्वदुदाहरणान्यपि मन्तव्यानि त्रयोदशैतेषाम्।

कृत्वार्धशश्च भागानिहापि सर्वं तथा रचयेत् ॥५१॥

स्थानाभिधानभाञ्जि त्रीण्यन्यानीति सन्ति यमकानि।

आदिर्मध्येऽन्ते वा मध्योऽन्ते तत्र परिवृत्तः॥५२॥

स रणे सरणेन नृपो बलितावलितारिजनः।

पदमाप दमात्स्वमतेरुचितं रुचितं च निजम्॥५३॥

घनाघ नायं न नभा घनाघनानुदारयन्नेति मनोऽनु दारयन्।

सखेऽदयं तामविलास खेदयन्नहीयसे गोरथवा न हीयसे॥५४॥

असतामहितो युधि सारतया रतया।

स तयोरुरुचे रुरुचे परमेभवते भवते॥५५॥

यमकानां गतिरेषा देशावयवावपेक्षमाणानाम्।

अनियतदेशावयवं तदपरमसंख्यं सदेवास्ति॥५६॥

कमलिनीमलिनी दयितं बिना न सहते सह तेन निषेविताम्।

तमधुना मधुना निहितं हृदि स्मरति सा रतिसारमहर्निशम्॥५७॥

कमलिनी सरसा सरसामियं विकसितानवमं नवमण्डनम्।

किमिति नाधिगता धिगताहृशं मधुकरेण बताणवता कृतम्॥५८॥

इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः।

सुविहितपदभङ्गं सुप्रसिद्धाभिधानं तदनु विरचनीयं सर्गबन्धेषु भूम्ना॥५९॥

**इति तृतीयोऽध्यायः**

## चतुर्थोऽध्यायः।

वक्तुं समर्थमर्थं सुश्लिष्टाक्लिष्टविविधपदसंधि।
युगपदनेकं वाक्यं यत्र विधीयते स श्लेषः॥१॥

वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानाम्।
आत्रायं मतिमद्भिर्विधीयमानोऽष्टधा भवति॥२॥

यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति।
वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः॥३॥

साधौ विधावपर्तावपराहावास्थितं विषादमितः।
आयासि दानवत्वं तद्धर्म्यं परमकुर्वाणः॥४॥

यस्मिन्विभक्तियोगः समासयोगश्च जायते विविधः।
पदभङ्गेषु विविक्तो विज्ञेयोऽसौ पदश्लेषः॥५॥

सुरतरुतलालसगलन्नयनोदकलालसत्कुचारोहम्।
समराजिदन्तररुचिरस्मिते नमदसौ शरीरमदः ॥६॥

नवरोमराजिराजितवलिवलयमनोहरतरसारं भाः।
धवलयति रोहितानवमद्ध्यानमदाहितस्तनि ते ॥७॥

स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम्।
लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः॥८॥

देवी मही कुमारी पद्मानां भावनी रसाहारी।

सुखनी राज तिरोऽहितमहिमानं तस्य तद्धारी॥९॥

यस्मिन्नुच्चार्यन्ते सुव्यक्तविविक्तभिन्नभाषाणि।

वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः॥१०॥

सरसबलं स हि सूरोऽसङ्गामे माणवं धुरसहावम्।

मित्तमसीसरदवरं ससरणमुद्धर इमं दबलम्॥११॥

कुलला लिलावलोले शलिलेशे शालशालिलवशूले।

कमलाशवलालिबलेऽमाले दिशमन्तकेऽविशमे॥१२॥

कमनेकतमादानं सुरतनरजतु च्छलं तदासीनम्।

अप्पतिमानं खमते सोऽगनिकानं नरं जेतुम्॥१३॥

तोदी सदिगगणमदोऽकलहं स सदा बलं विदन्तरिदम्।

आर दमेहावसरं सासदमारं गदासारम्॥१४॥

धीरागच्छदुमे हतमुदुद्धरवारिसदःसु।

अभ्रमदप्प्रसराहरणुरविकिरणा तेजःसु॥१५॥

वाक्ये यत्रैकस्मिन्ननेकभाषानिबन्धनं क्रियते।

अयमपरो विद्वद्भिर्भाषाश्लेषोऽत्र विज्ञेयः ॥१६॥

समरे भीमारम्भं विमलासु कलासु सुन्दरं सरसम्।
सारं सभासु सूरिं तमहं सुरगुरुसमं वन्दे ॥१७॥

शूलं शलन्तु शं वा विशन्तु शबला वशं विशङ्का वा।
अशमदशं दुःशीला दिशन्ति काले खला अशिवम्॥१८॥

चम्पककलिकाकोमलकान्तिकपोलाथ दीपिकानङ्गी।
इच्छति गजपतिगमना चपलायतलोचना लपितुम्॥१९॥

अधरदलं ते तरुणा मदिरामदमधुरवाणि सामोदम्।
साधु पिबन्तु सुपीवरपरिणाहिपयोधरारम्भे ॥२०॥

क्रीडन्ति प्रसरन्ति मधु कमलप्रणयि लिहन्ति।
भ्रमरा मित्र सुविभ्रमा मत्ता भूरि रसन्ति॥२१

एवं सर्वासामपि कुर्वीत कविः परस्परं श्लेषम्।
अनयैव दिशा भाषास्त्र्यादी रचयेद्यथाशक्ति॥२२॥

अकलङ्ककुल कलालय बहुलीलालोल विमलबाहुबल।
खलमौलिकील कोमल मङ्गलकमलाललाम लल॥२३॥

सिद्ध्यति यत्रानन्यैः सारूप्यं प्रत्ययागमोपदैः।
प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः॥२४॥

परहृदयविदसुरहितप्राणनमत्काव्यकृत्सुधारसनुत्।
सौरमनारं कलयति सदसि महत्कालचित्सारम्॥२५॥

यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम्।
सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः॥२६

तापनमाजं पावनमारं हारं पराप दासेयः।
कारं चारणमाहितमाज दरं साधनं बहुशः॥२७॥

सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति।
सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम्॥२८॥

आयामो दानवतां सरति बले जीवतां न नाकिरताम्।
नयदानवाँल्ललामः किमभूरसि दारुणः सहसा॥२९॥

आर्योऽसि तरोमाल्यः सत्योऽनतकुक्षयैः स्तवावाच्यः।
सन्नाभयो युवतयः सन्मुख्यः सुनयना वन्द्यः॥३०॥

भाषाश्लेषविहीनः स्पृशति प्रायोऽन्यमप्यलंकारम्।
धत्ते वैचित्र्यमयं सुतरामुपमासमुच्चययोः॥३१॥

स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः॥३२॥

यदनेकपयोधिभुजस्तवैव सदृशोऽस्यहीनसुरतरसः।

ननु बलिजितः कथं ते सदृशस्तदसौ सुराधिकृतः॥३३।

वसुधामहितसुराजितनीरागमना भवांश्च वर्षाश्च।

सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते॥३४॥

शब्दानुशासनमशेषमवेत्य सम्यगालोच्य लक्ष्यमधिगम्य च देशभाषाः।

यत्नादधीत्य विविधानभिधानकोषाञ्श्लेषं महाकविरिमं निपुणो विदध्यात्॥३५॥

इति चतुर्थोऽध्यायः

## पञ्चमोऽध्यायः।

भङ्ग्यन्तरकृततत्क्रमवर्णनिमित्तानि वस्तुरूपाणि।

साङ्कानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम्॥१॥

तच्चक्रखड्गमुसलैर्बाणासनशक्तशूलहलैः।

चतुरङ्गपीठविरचितरथतुरगगजादिपदपाठैः॥२॥

अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः।

इत्यादिभिरन्यैरपि वस्तुविशेषाकृतिप्रभवैः ॥ ३ ॥

भेदैर्विभिद्यमानं संख्यातुमनन्तमस्मि नैतदलम् ।

तस्मादेतस्य मया दिङ्मात्रमुदाहृतं कवयः ॥ ४ ॥

यन्नाम नाम यत्स्यात्तदाकृतिर्लक्षणं मतं तस्य।

तल्लक्ष्यमेव दृष्ट्वावधार्यमखिलं तदन्यदपि॥५॥

मारारिशक्ररामेभमुखैरासाररंहसा।

सारारब्धस्तवा नित्यं तदर्तिहरणक्षमा॥६॥

माता नतानां संघट्टः श्रियां बाधितसंभ्रमा।

मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा॥७॥ खड्गबन्धः॥

मायाविनं महाहावा रसायातं लसद्भुजा।

जातलीलायथासारवाचं महिषमावधीः॥८॥ मुसलम्॥

मामभीदा शरण्या मुत्सदैवारुक्प्रदा च धीः।

धीरा पवित्रा संत्रासात्त्रासीष्ठा मातरारम॥९॥ धनुः॥

माननापरुषं लोकदेवीं सद्रस सन्नम।

मनसा सादरं गत्वा सर्वदा दास्यमङ्गताम्॥१०॥शरः॥

मा मुषो राजस स्वासूंल्लोककूटेशदेवताम्।

तां शिवावाशितां सिद्ध्याध्यासितां हि स्तुतां स्तुहि॥११॥ शूलम्॥

माहिषाख्ये रणेऽन्या नु सा नु नानेयमत्र हि।

हिमातङ्गादिवामुं च कं कम्पिनमुपप्लुतम्॥१२॥शक्तिः॥

मातङ्गानङ्गविधिनामुना पादं तमुद्यतम्।

तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा॥१३॥हलम्॥

इतीक्षिता सुरैश्चक्रे या यमामममायया।

महिषं पातु वो गौरी सायतासिसितायसा॥१४॥रथपदम्॥ (विशेषकम्)

सेना लीलीलीना नाली लीनाना नानालीलीली।

नालीनालीले नालीना लीलीलीली नानानानाली॥१५॥

ये नानाधीनावा धीरा नाधीवा राधीरा राजन्।

किं नानाशं नाकं शं ते नाशंकन्तेऽशं ते तेजः॥१६॥

वेदापन्ने स शक्ले रचितनिजरुग्गुच्छेदयत्नेऽरमेरे

देवासक्तेऽमुदक्षो बलदमनयदस्तोददुर्गासवासे।

सेवासर्गादुदस्तो दयनमदलवक्षोदमुक्ते सवादे

रेमे रत्नेऽयदच्छे गुरुजनितचिरक्लेशसन्नेऽपदावे॥१७॥

सरसायारिवीरालीरसनव्याध्यदेश्वरा।

सा नः पायादरं देवी याव्यायागमदध्यरि॥१८॥

सरलाबहलारम्भतरलालिबलारवा।

वारलाबहलामन्दकरला बहलामला॥१९॥

रसा साररसा सार सायताक्ष क्षतायसा।

सातावात तवातासा रक्षतस्त्वस्त्वतक्षर॥२०॥

या पात्यपायपतितानवतारिताया

यातारिपावपति वाग्भुवनानि माया।

यामानिना वपतु वो वसु सा स्वगेया

यागे स्वसासुररिपोर्जयपात्यपाया॥२१।

समरणमहितोपा यास्तनामारिपाता

वनरतिसरमाया वानरा मापसारम्।

अमरततवरालीमानमासाद्य नेदू

रणमहिमतताशा धीरभावेऽसिराते॥२२॥

सरमणहिमतोयापास्तमानारितापा-

वरनतिरसमावायानमारा परं सा।

अरमत बत रामा लीनसामाद्यदूने-

रमणहितमताधीशारवे भासितेरा॥२३॥

मात्राबिन्दुच्युतके प्रहेलिका कारकक्रियागूढे।

प्रश्नोत्तरादि चान्यत्क्रीडामात्रोपयोगमिदम्॥२४॥

मात्राबिन्दुच्यवनादन्यार्थत्वेन तच्च्युते नाम।

स्पष्टप्रच्छन्नार्था प्रहेलिका व्याहृतार्था च॥२५॥

प्रच्छन्नत्वाद्भवतस्तद्गूढे कारकक्रियान्तरयोः।

प्रश्नानां च बहूनामुत्तरमेकं भवेद्यत्र॥२६॥

प्रश्नोत्तरं तदेतद् व्यस्तसमस्तादिभिर्भवेद् बहुधा

भेदैरनेकभाषं ........................ च भिद्यते॥२७॥

नियतमगम्यमदृश्यं भवति किल त्रस्यतो रणोपान्तम्।

कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा॥२८॥

कानि निकृत्तानि कथं कदलीवनवासिना स्वयं तेन।

कथमपि न दृश्यतेऽसावन्वक्षं हरति वसनानि॥२९॥

पिबतो वारि तवास्यां सरिति शरावेण पातितौ केन।
वारि शिशिरं रमण्यो रतिखेदादपुरुषस्येव॥३०॥

उद्यन्दिवसकरोऽसौ किं कुरुते कथय मे मृगायाशु।
कथयानिन्द्राय तथा किं करवाणि क्वणितुकामः॥३१॥

अहिणवकमलदलारुणिण माणु फुरत्तिण केण।
जाणिज्जई तरुणीअणस्स निद्धा भण अहरेण॥३२॥

इत्थं स्थितस्यास्य दिशं निशम्य शब्दार्थवित्क्षोदितचित्रवृत्तः।
आलोच्य लक्ष्यं च महाकवीनां चित्रं विचित्रं सुकविर्विदध्यात्॥३३॥

इति पञ्चमोऽध्यायः

## षष्ठोध्यायः

पदवाक्यस्थो दोषो वाक्यविशेषप्रयोगनियमेन।

यः परिहृतस्ततोऽन्यस्तदतिव्याप्तिश्च संह्रियते॥१॥

असमर्थमप्रतीतं विसंधि विपरीतकल्पनं ग्राम्यम्।

अव्युत्पत्ति च देश्यं पदमिति सम्यग्भवेद्दुष्टम्॥२॥

पदमिदमसमर्थं स्याद्वाचकमर्थस्य तस्य न च वक्तुम्।

तं शक्नोति तिरोहिततत्सामर्थ्यं निमित्तेन॥३॥

धातुविशेषोऽर्थान्तरमुपसर्गविशेषयोगतो गतवान्।

असमर्थः स स्वार्थे भवति यथा प्रस्थितः स्थास्नौ॥४॥

इदमपरमसामर्थ्यं धातोर्यत्पठ्यते तदर्थोऽसौ।

न च शक्नोति तमर्थं वक्तुं गमनं यथा हन्ति॥५॥

शब्दप्रवृत्तिहेतौ सत्यप्यसमर्थमेव रूढिबलात्।

यौगिकमर्थविशेषं पदं यथा वारिधौ जलभृत्॥६॥

निश्चीयते न यस्मिन्वस्तु विशिष्टं पदे समानेन।

असमर्थं तच्च यथा मेघच्छविमारोहाश्वम्॥७॥

यत्पदमभिनयसहितं कुरुतेऽर्थविशेषनिश्चयं सम्यक्।

नैकमनेकार्थतया तस्य न दुष्येदसामर्थ्यम्॥८॥

शब्दानामत्र सदानेकार्थानां प्रयुज्यमानानाम्।
निश्चीयते हि सोऽर्थः प्रकरणशब्दान्तराभिनयैः॥९॥

सा सुन्दर तव विरहे सुतनुरियन्मात्रलोचना सपदि।
एतावतीमवस्थां याता, दिवसैरियन्मात्रैः॥१०॥

युक्तया वक्ति तमर्थं न च रूढं यत्र निमित्तमेकस्मिन्।
द्वेधा तदप्रतीतं संशयवदसंशयं च पदम्॥११॥

साधारणमपरेष्वपि गुणादि कृत्वा निमित्तमेकस्मिन्।
यत्कृतमभिधानतयार्थे संशयवद्यथा हिमहा॥१२॥

पदमपरमप्रतीतं यद्यौगिकरूढशब्दपर्यायैः।
कल्पितमर्थे तस्मिन्यथाश्वयोषिन्मुखार्चिष्मान्॥१३॥

यस्यादिपदेन समं संधिर्न भवेद्भवेद्विरुद्धो वा।
तदिति विसंधि स इत्थं मन्थरया भरत आहूतः॥१४॥

तत्रासत्संधि पदं कृतमसकृदयुक्तितो भवेद्दुष्टम्।
दूरं तु वर्जनीयं विरुद्धसंधि प्रयत्नेन॥१५॥

पूर्वार्थप्रतिपन्थी यस्यार्थः स्पष्ट एवं संभवति।
विपरीतकल्पनं तद्भवति पदमकार्यमित्त्रमिव॥१६॥

यदनुचितं यत्र पदं तत्तत्रैवोपजायते ग्राम्यम्।

तद्वक्तृवस्तुविषयं विभिद्यमानं द्विधा भवति॥१७॥

वक्ता त्रिधा प्रकृत्या नियतं स्यादधममध्यमोत्तमया।
तत्र च कश्चित्किचिन्नैवार्हति पदमुदाहर्तुम्॥१८॥

तत्रभवन्भगवन्निति नार्हत्यधमो गरीयसो वक्तुम्।
भट्टारकेति च पुनर्नैवैतानुत्तमप्रकृतिः॥१९॥

तत्रभवन्भगवन्निति नैवार्हत्युत्तमोऽपि राजानम्
वक्तुं नापि कथंचिन्मुनिमपि परमेश्वरेशेति॥२०॥

पदमिदमनुचितमपरं सभ्यासभ्यार्थवाचि सभ्येऽर्थे।
तद्धि प्रयुज्यमानं निदधाति मनस्यसभ्यमपि॥२१॥

वारयति सखी तस्या यथा यथा तां तथा तथा सापि।
रोदितितरां वराकी बाष्पभरक्लिन्नगण्डमुखी॥२२॥

अर्थविशेषवशाद्वा सभ्येऽपि तथा क्वचिद्विभक्तेर्वा॥
अनुचितभावं मुञ्चति तथाविधं तत्पदं सदपि॥२३॥

कथमिव वैरिगजानां मदसलिलक्लिन्नगण्डभित्तीनाम्।
दुर्वारापि घटासौ विशांपते दारिता भवता॥२४॥

मञ्जीरादिषु रणितप्रायान्पक्षिषु च कूजितप्रभृतीन्।

मणितप्रायान्सुरते मेघादिषु गर्जितप्रायान्॥२५॥

दृष्टा प्रयुज्यमानानेवंप्रायांस्तथा प्रयुञ्जीत।
अन्यत्रैतेऽनुचिताः शब्दार्थत्वे समानेऽपि॥२६॥

प्रकृतिप्रत्ययमूला व्युत्पत्तिर्नास्ति यस्य देश्यस्य।
तन्मडहादि कथंचन रूढिरिति न संस्कृते रचयेत्॥२७॥

इत्थं पददोषाणां दिङ्मात्रमुदाहृतं हि सर्वेषाम्।
तस्मादनयैव दिशा ततोऽन्यदभ्यूह्यमभियुक्तैः॥२८॥

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन्निन्दन्।
यत्पदमसकृद् ब्रूयात्तत्पुनरुक्तं न दोषाय॥२९॥

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति।
चित्रं चित्रमरोदीद्धा हेति परा‍हते पुत्रे॥३०॥

जय जय वैरिविदारण कुरु कुरु पादं शिरःसु शत्रूणाम्।
धिग्धिक्तमरिं यस्त्वामप्रणमन्स्वं विनाशयति॥३१॥

यत्पदमर्थेऽन्यस्मिंस्तत्पर्यायोऽथवा प्रयुज्येत।
वीप्सायां च पुनस्तन्न दुष्टमेवं प्रसिद्धं च ॥३२॥

गजरक्तरक्तकेसरभारः सिंहोऽत्र तनुशरीरोऽपि।

दिशि दिशि करिकुलभङ्गं वारंवारं खरैः कुरुते॥३३॥

यच्च प्रतिपत्ता वा न प्रतिपद्येत वस्तु सकृदुक्तम्।
तत्र पदं वाक्यं वा पुनरुक्तं नैव दोषाय॥३४॥

किं चिन्तयसि सखे त्वं वच्मि त्वामस्मि पश्य पश्येदम्।
ननु किं न पश्यसीदृक्पश्य सखे सुन्दरं स्त्रैणम्॥३५॥

अन्याभिधेयमपि सत्प्रयुज्यते यत्पदं प्रशंसार्थम्।
तस्य न दोषाय स्यादाधिक्यं पौनरुक्त्यं वा॥ ३६॥

नासीरोद्धतधूलीधवलितसकलारिकेशहस्तस्य।
अविलङ्घयोऽयं महिमा तव मेरुमहीधरस्येव॥३७॥

यस्मिन्ननेकमर्थं स्वयमेवालोचयेत्तदर्थानि।
जल्पन्पदानि तेषामसंगतिर्नैव दोषाय॥३८॥

कुसुमभरः सुतरूणामहो नु मलयानिलस्य सेव्यत्वम्।
सुमनोहरः प्रदेशो रूपमहो सुन्दरं तस्याः॥३९॥

वाक्यं भवति तु दुष्टं संकीर्णं गर्भितं गतार्थं च।
यत्पुनरनलंकारं निर्दोषं चेति तन्मध्यम्॥४०॥

वाक्येन यस्य साकं वाक्यस्य पदानि सन्ति मिश्राणि।

तत्संकीर्णं गमयेदनर्थमर्थं न वा गमयेत्॥४१॥

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणैनम्।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्॥४२॥

यस्य प्रविशेदन्तर्वाक्यं वाक्यस्य संगतार्थतया।
तद्गर्भितमिति गमयेन्निजमर्थं कष्टकल्पनया॥४३॥

योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया।
रक्षैनं मृत्युमुखं प्रसह्य लघु नीयते विवशः॥४४॥

यस्यार्थः सामर्थ्यादन्यार्थैरेव गम्यते वाक्यैः।
तदिति प्रबन्धविषयं गतार्थमेतत्ततो विद्यात्॥४५॥

पुष्टार्थालंकारं मध्यममपि सादरं रचयेत्।
गामभ्याजेति यथा यत्किञ्चिदतोऽन्यथा तद्धि॥४६॥

अनुकरणभावमविकलमसमर्थादि स्वरूपतो गच्छन्।
न भवति दुष्टमतादृग्विपरीतक्लिष्टवर्णं च ॥४७॥

इतिषष्ठोऽध्यायः

## सप्तमोऽध्यायः

अर्थः पुनरभिधावान्प्रवर्तते यस्य वाचकः शब्दः।
तस्य भवन्ति द्रव्यं गुणः क्रिया जातिरिति भेदाः॥१॥

जातिक्रियागुणानां पृथगाधारोऽत्र मूर्तिमद्   व्यम्।
दिक्कालाकाशादि तु नीरूपमविक्रियं भवति॥२॥

नित्यानित्यचराचरसचेतनाचेतनैर्बहुभिः।
भेदैर्विभिन्नमेतद् द्विधा भूरिशो भवति॥३॥

द्रव्यादपृथग्भूतो भवति गुणः सततमिन्द्रियग्राह्यः।
सहजाहार्यावस्थिकभावविशेषादयं त्रेधा॥४॥

नित्यं क्रियानुमेया द्रव्यविकारेण भवति धात्वर्थः।
कारकसाध्या द्वेधा सकर्मिकाकर्मिका चेति॥५॥

भिन्नक्रियागुणेष्वपि बहुषु द्रव्येषु चित्रगात्रेषु।
एकाकारा बुद्धिर्भवति यतः सा भवेज्जातिः॥६॥

सर्वः स्वं स्वं रूपं धत्तेऽर्थो देशकालनियमं च।
तं च न खलु बध्नीयान्निष्कारणमन्यथातिरसात्॥७॥

सुकविपरम्परया चिरमविगीततयान्यथा निबद्धं यत्।
वस्तु तदन्यादृशमपि बध्नीयात्तत्प्रसिद्ध्यैव॥८॥

अर्थस्यालंकारा वास्तवमौपम्यमतिशयः श्लेषः।

एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः॥९॥

वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत्।

पुष्टार्थमविपरीतं निरुपममनतिशयमश्लेषम्॥१०॥

तस्य सहोक्तिसमुच्चयजातियथासंख्यभावपर्यायाः।

विषमानुमानदीपकपरिकरपरिवृत्तिपरिसंख्याः॥११॥

हेतुः कारणमाला व्यतिरेकोऽन्योन्यमुत्तरं सारम्।

सूक्ष्मं लेशोऽवसरो मीलितमेकावली भेदाः॥१२॥

भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथाभूतम्।

उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा॥१३॥

कष्टं सखे क्व यामः सकलजगन्मन्मथेन सह तस्याः।

प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बभित्तिभरः॥१४॥

यो वा येन क्रियते तथैव भवता च तेन तस्यापि।

अभिधानं यत्क्रियते समानमन्या सहोक्तिः सा॥१५॥

भवदपराधैः सार्धं संतापो वर्धतेतरां तस्याः।

क्षयमेति सा वराकी स्नेहेन समं त्वदीयेन॥१६॥

अन्योन्यं निरपेक्षौ यावर्थावेककालमेकविधौ।

भवतस्तत्कथनं यत्सापि सहोक्तिः किलेत्यपरे॥१७॥

कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि।

सह कमलैर्ललनानां मानः संकोचमायाति॥१८॥

यत्रैकत्रानेकं वस्तु परं स्यात्सुखावहाद्येव।

ज्ञेयः समुच्चयोऽसौ त्रेधान्यः सदसतोर्योगः ॥१९॥

दुर्गं त्रिकूटं परिखा पयोनिधिः प्रभुर्दशास्यः सुभटाश्च राक्षसाः।

नरोऽभियोक्ता सचिवैः पल्वङ्गमैः किमत्र वो ह्यास्यपदे महद्भयम्॥२०॥

सुखमिदमेतावदिह स्फारस्फुरदिन्दुमण्डला रजनी।

सौधतलं काव्यकथा सुहृदः स्निग्धा विदग्धाश्च॥२१॥

तरलत्वममालिन्यं पक्ष्मलतामायतिं सुमाधुर्यम्।

आधास्यन्नस्त्रत्वं मदनस्तव नयनयोः कुरुते॥२२॥

प्रस्फुरयन्नधरोष्ठं गात्रं रोमाञ्चयन्गिरः स्खलयन्।

मण्डयति रहसि तरुणीः कुसुमशरस्तरलयन्नयने॥२३॥

सामोदे मधु कुसुमे जननयनानन्दने सुधा चन्द्रे।

क्वचिदपि रूपवति गुणा जगति सुनीतं विधातुरिदम्॥२४॥

आलिंङ्गिताः करीरैः शम्यस्तप्तोषपांसुनिचयेन।

मरुतोऽतिखरा ग्रीष्मे किमतोऽन्यदभद्रमस्तु मरौ॥२५॥

कमलवनेषु तुषारो रूपविलासादिशालिनीषु जरा।

रमणीष्वपि दुश्चरितं धातुर्लक्ष्मीश्च नीचेषु॥२६॥

व्यधिकरणे वा यस्मिन्गुणक्रिये चैककालमेकस्मिन्।

उपजायेते देशे समुच्चयः स्यात्तदन्योऽसौ॥२७॥

विदलितसकलारिकुलं तव बलमिदमभवदासु विमलं च।

प्रखलमुखानि नराधिप मलिनानि च तानि जातानि॥२८॥

दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च।

अविरलविलोलजलदः कालः समुपागतश्चयाम्॥२९॥

संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति।

लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः॥३०॥

शिशुमुग्धयुवतिकातरतिर्यक्संभ्रान्तहीनपात्राणाम्।

सा कालावस्थोचितचेष्टासु विशेषतो रम्या॥३१॥

धूलीधूसरतनवो राज्यस्थितिरचनकल्पितैकनृपाः।

कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भरं डिम्भाः॥३२॥

हरति सुचिरं गाढाश्लेषे यदङ्गकमाकुला स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने।

यदतिबहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फुटं रमयतितरां तेनैवासौ मनोऽभिनवा वधूः॥३३॥

निर्दिश्यन्ते यस्मिन्नर्था विविधा ययैव परिपाट्या।

पुनरपि तत्प्रतिबद्धास्तयैव तत्स्याद्यथासंख्यम्॥३४॥

तद्द्विगुणं त्रिगुणं वा बहुषूद्दिष्टेषु जायते रम्यम्।

यत्तेषु तथैव ततो द्वयोस्तु बहुशोऽपि बघ्नीयात्॥३५॥

कज्जलहिमकनकरुचः सुपर्णवृषहंसवाहनाः शं वः।

जलनिधिगिरिपद्मस्था हरिहरचतुराननना ददतु॥३६॥

दुग्धोदधिशैलस्थौ सुपर्णवृषवाहनौ घनेन्दुरुची।

मधुमकरध्वजमथनौ पातां वः शाङ्गर्शूलधरौ॥३७॥

यस्य विकारः प्रभवन्नप्रतिबद्धेन हेतुना येन।

गमयति तदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ॥३८॥

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।

पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥३९॥

अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम्।

अर्थान्तरमवगमयति यद्वाक्यं सोऽपरो भावः॥४०॥

एकाकिनी यदबला तरुणी तथाहमस्मिन्गृहे गृहपतिश्च गतो विदेशम्।

किं याचसे तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ॥४१॥

वस्तु विवक्षितवस्तुप्रतिपादनशक्तमसदृशं तस्य।

यदजनकमजन्यं वा तत्कथनं यत्स पर्यायः॥४२॥

राजञ्जहासि निद्रां रिपुबन्दीनिबिडनिगडशब्देन।

तेनैव यदन्तरितः स कलकलो बन्दिवृन्दस्य॥४३॥

यत्रैकमनेकस्मिन्ननेकमेकत्र वा क्रमेण स्यात्।

वस्तु सुखादिप्रकृति क्रियते वान्यः स पर्यायः॥४४॥

कमलेषु विकासोऽभूदुदयति भानावुपेत्य कुमुदेभ्यः।

नभसोऽपससार तमो बभूव तस्मिन्नथालोकः॥४५॥

आच्छिद्य रिपोर्लक्ष्मीः कृता त्वया देव भृत्यभवनेषु।

दत्तं भयं द्विषद्भ्यः पुनरभयं याचमानेभ्यः ॥४६॥

विषम इति प्रथितोऽसौ वक्ता विघटयति कमपि संबन्धम्।

यत्रार्थयोरसन्तं परमतमाशङ्क्य तत्सत्त्वे॥४७॥

यो यस्य नैव विषयो न स तं कुर्यादहो बलात्कारः।

सततं खलेषु भवतां क्व खलाः क्व च सज्जनस्तुतयः॥४८॥

अभिधीयते सतो वा संबन्धस्यार्थयोरनौचित्यम्।
यत्र स विषमोऽन्योऽयं यन्नासंभाव्यभावो वा ॥४९॥

रूपं क्व मधुमेतत्क्व चेदमस्याः सुदारुणं व्यसनम्।
इति चिन्तयन्ति पथिकास्तव वैरिवधूं वने दृष्ट्वा॥५०॥

तदिति चतुर्धा विषमं यत्राण्वपि नैव गुर्वपि च कार्यात्।
कार्यं कुर्यात्कर्ता हीनोऽपि ततोऽधिकोऽपि न वा॥५१॥

त्वद्भृत्यावयवानपि सोढुं समरे क्षमा न ते क्षुद्राः।
असिधारापथपतितं त्वं तु निहन्या महेन्द्रमपि॥५२॥

त्वं तावदास्व दूरे भृत्यावयवोऽपि ते निहन्त्यहितान्।
का गणना तैः समरे सोढुं शक्रोऽपि न सहस्त्वाम्॥५३॥

यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत्।
कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम्॥५४॥

उत्कण्ठा परितापो रणरणकं जागरस्तनोस्तनुता।
फलमिदमहो मयाप्तं सुखाय मृगलोचनां दृष्ट्वा॥५५॥

वस्तु परोक्षं यस्मिन्साध्यमुपन्यस्य साधकं तस्य।
पुनरन्यदुपन्यस्येद्विपरीतं चैतदनुमानम्॥५६॥

सावज्ञमागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः।

कथमन्यथा ललाटे, यावकरसतिलकपङ्क्तिरियम्॥५७॥

वचनमुपचारगर्भं दूरादुद्गमनमासनं सकलम्।

इदमद्य मयि तथा ते यथासि नूनं प्रिये कुपिता॥५८॥

यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति।

भावीति वा तथान्यत्कथ्येत तदन्यदनुमानम्॥५९॥

अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः।

अयमायातः कालो हन्त मृताः पथिकगेहिन्यः॥६०॥

दिष्ट्या न मृतोऽस्मि सखे नूनमिदानीं प्रिया प्रसन्ना मे।

ननु भगवानयमुदितस्त्रिभुवनमानन्दयन्निन्दुः॥६१॥

यास्यन्ति यथा तूर्णं विकसितकमलोज्ज्वलादमी सरसः।

हंसा यथैवमेतां मलिनयति घनावली ककुभम्॥६२॥

वहति यथा मलयमरुद्यथा च हरितीभवन्ति विपिनानि।

प्रियसखि तथेह न चिरादेष्यति तव वल्लभो नूनम्॥६३॥

यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति।

तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा॥६४॥

आदौ मध्येऽन्ते वा वाक्ये तत्संस्थितं च दीपयति।

वाक्यार्थानिति भूयस्त्रिधैतदेवं भवेत्षोढा॥६५॥

कान्ता ददाति मदनं मदनः संतापमसममनुपशमम्।

संतापो मरणमहो तथापि शरणं नृणां सैव॥६६॥

तारुण्यमाशु मदनं मदनः कुरुते विलासविस्तारम्।

स च रमणीषु प्रभवञ्जनहृदयावर्जनं बलवत्॥६७॥

नवयौवनमङ्गेषु प्रियसङ्गमनोरथो हि हृदयेषु।

अथ चेष्टासु विकारः प्रभवति रम्यः कुमारीणाम्॥६८॥

निद्रापहरति जागरमुपशमयति मदनदहनसंतापम्॥

जनयति कान्तासंगमसुखं च कोऽन्यस्ततो बन्धुः॥६९॥

स्रंसयति गात्रमखिलं ग्लपयति चेतो निकामनुरागः।

जनमसुलभं प्रति सखे प्राणानपि मङ्क्षु मुष्णाति॥७०॥

दूरादुत्कण्ठन्ते दयितानां संनिधौ तु लज्जन्ते।

त्रस्यन्ति वेपमानाः शयने नवपरिणया वध्वः॥७१॥

साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशिष्येत।

द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति॥७२॥

उचितपरिणामरम्यं स्वादु सुगन्धि स्वयं करे पतितम्।

फलमुत्सृज्य तदानीं ताम्यसि मुग्धे मुधेदानीम्॥७३॥

कार्येषु विघ्नतेच्छं विहितमहीयोपराधसंवरणम्।
अस्माकमधन्यानामार्जवमपि दुर्लभं जातम्॥७४॥

सततमनिर्वृतमानसमायाससहस्रसंकटक्लिष्टम्।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम्॥७५॥

अत्यन्तमसहनानामुरुशक्तीनामनिघ्नवृत्तीनाम्।
एकं सकले जगति स्पृहणीयं जन्म केसरिणाम्॥७६॥

युगपद्दानादाने अन्योन्यं वस्तुनोः क्रियते यत्।
क्वचिदुपचर्येते वा प्रसिद्धितः सेति परिवृत्तिः॥७७॥

दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया क्रीताः।
किं त्वपहरसि मनो यद्ददासि रणरणकमेतदसत्॥७८॥

पृष्टमपृष्टं वा सद्गुणादि यत्कथ्यते क्वचित्तुल्यम्।
अन्यत्र तु तदभावः प्रतीयते सेति परिसंख्या॥७९॥

किं सुखमपारतन्त्र्यं किं धनमविनाशि निर्मला विद्या।
किं कार्यं संतोषो विप्रस्य महेच्छता राज्ञाम्॥८०॥

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति॥८१॥

हेतुमता सह हेतोरभिधानमभेदकृद्भवेद्यत्र।
सोऽलंकारो हेतुः स्यादन्येभ्यः पृथग्भूतः॥८२॥

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः॥८३॥

कारणमाला सेयं यत्र यथापूर्वमेति कारणताम्।
अर्थानां पूर्वार्थाद्भवतीदं सर्वमेवेति॥८४॥

विनयेन भवति गुणवान्गुणवति लोकोऽनुरज्यते सकलः।
अभिगम्यतेऽनुरक्तः ससहायो युज्यते लक्ष्म्या॥ ८५॥

यो गुण उपमेये स्यात्तत्प्रतिपन्थी च दोष उपमाने।
व्यस्तसमस्तन्यस्तौ तौ व्यतिरेकं त्रिधा कुरुतः॥८६॥

सकलङ्केन् जडेन साम्यं दोषाकरेण कीदृक्ते।
अभुजङ्गः समनयनः कथमुपमेयो हरेणासि॥८७॥

तरलं लोचनयुगलं कुवलयमचलं किमेतयोः साम्यम्।
विमलं मलिनेन मुखं शशिना कथमेतदुपमेयम्॥८८॥

यो गुण उपमाने वा तत्प्रतिपन्थी च दोष उपमेये।
भवतो यत्र समस्तौ स व्यतिरेकोऽयमन्यस्तु॥८९॥

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते सत्यम्।

विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु॥९०॥

यत्र परस्परमेकः कारकभावोऽभिधेययोः क्रियया।

संजायेत स्फारिततत्त्वविशेषस्तदन्योन्यम्॥९१॥

रूपं यौवनलक्ष्म्या यौवनमपि रूपसंपदस्तस्याः।

अन्योन्यमलङ्करणं विभाति शरदिन्दुसुन्दर्याः॥९२॥

उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम्।

क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र॥९३॥

भण मानमन्यथा मे भ्रुकुटिं मौनं विधातुमहमसहा।

शक्नोमि तस्य पुरतः सखि न खलु पराङ्मुखीभवितुम्॥९४॥

किं स्वर्गादधिकसुखं बन्धुसुहृत्पण्डितैः समं लक्ष्मीः।

सौराज्यमदुर्भिक्षं सत्काव्यरसामृतास्वादः ॥९५॥

यत्र यथासमुदायाद्यथैकदेशं क्रमेण गुणवदिति।

निर्धार्यते परावधि निरतिशयं तद्भवेत्सारम्॥९६॥

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम्।

सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम्॥९७॥

यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम्।
अर्थान्तरमुपपत्तिमदिति तत्संजायते सूक्ष्मम् ॥ ९८॥

आदौ पश्यति बुद्धिर्व्यवसायोऽकालहीनमारभते।
धैर्यं व्यूढमहाभरमुत्साहः साधयत्यर्थम्॥९९॥

दोषीभावो यस्मिन्गुणस्य दोषस्य वा गुणीभावः।
अभिधीयते तथाविधकर्मनिमित्तः स लेशः स्यात्॥१००॥

अन्यैव यौवनश्रीस्तस्याः सा कापि दैवहतिकायाः।
मथ्नाति यया यूनां मनांसि दूरं समाकृष्य॥१०१॥

हृदयं सदैव येषामनभिज्ञं गुणवियोगदुःखस्य।
धन्यास्ते गुणहीना विदग्धगोष्ठीरसापेताः॥१०२॥

अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणं क्रियते।
अर्थस्य तदभिधानप्रसङ्गतो यत्र सोऽवसरः॥१०३॥

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी।
निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः॥१०४॥

सा सिप्रानाम नदी यस्यां मङ्क्षूर्मयो विशीर्यन्ते।
मज्जन्मालवललनाकुचकुम्भास्फालनव्यसनात्॥१०५॥

तन्मीलितमिति यस्मिन्समानचिह्नेन हर्षकोपादि।

अपरेण तिरस्क्रियते नित्येनागन्तुकेनापि॥१०६॥

तिर्यक्प्रेक्षणतरले सुस्निग्धे च स्वभावतस्तस्याः।

अनुरागो नयनयुगे सन्नपि केनोपलक्ष्येत॥१०७॥

मदिरामदभरपाटलकपोलतललोचनेषु वदन्तु।

कोपो मनस्विनीनां न लक्ष्यते कामिभिः प्रभवन्॥१०८॥

एकावलीति सेयं यत्रार्थपरम्परा यथालाभम्।

आधीयते यथोत्तरविशेषणा स्थित्यपोहाभ्याम्॥१०९॥

सलिलं विकासिकमलं कमलानि सुगन्धिमधुसमृद्धानि।

मधु लीनालिकुलाकुलमलिकुलमपि मधुररणितमिह॥११०॥

नाकुसुमस्तरुरस्मिन्नुद्याने नामधूनि कुसुमानि।

नालीनालिकुलं मधु नामधुरक्वाणमलिवलयम्॥१११॥

**इतिसप्तमोऽध्यायः**

## अष्टमोऽध्यायः।

सम्यक्प्रतिपादयितुं स्वरूपतो वस्तु तत्समानमिति।
वस्त्वन्तरमभिदध्याद्वक्ता यस्मिंस्तदौपम्यम्॥१॥

उपमोत्प्रेक्षारूपकमपह्नुतिः संशयः समासोक्तिः।
मतमुत्तरमन्योक्तिः प्रतीपमर्थान्तरन्यासः॥२॥

उभयन्यासभ्रान्तिमदाक्षेपप्रत्यनीकदृष्टान्ताः।
पूर्वसहोक्तिसमुच्चयसाम्यस्मरणानि तद्भेदाः॥३॥

उभयोः समानमेकं गुणादि सिद्धं भवेद्यथैकत्र।
अर्थेऽन्यत्र तथा तत्साध्यत इति सोपमा त्रेधा॥४॥

वाक्योपमात्र षोढा तत्र त्वेका प्रयुज्यते यत्र।
उपमानमिवादीनामेकं सामान्यमुपमेयम्॥५॥

कमलमिव चारुवदनं मृणालमिव कोमलं भुजायुगलम्।
अलिमालेव सुनीला तवैव मदिरेक्षणे कबरी॥६॥

इयमन्या सामान्यं यत्रेवादिप्रयोगसामर्थ्यात्।
गम्यते सुप्रसिद्धं तद्वाचिपदाप्रयोगेऽपि॥७॥

शशिमण्डलमिव वदनं मृणालमिव भुजलतायुगलमेतत्।
करिकुम्भाविव च कुचौ रम्भागर्भाविवोरू ते॥८॥

वस्त्वन्तरमस्त्यनयोर्न सममिति परस्परस्य यत्र भवेत्।

उभयोरुपमानत्वं सक्रममुभयोपमा सान्या॥९॥

शशिमण्डलमिव विमलं वदनं ते मुखमिवेन्दुबिम्बमपि।

कुमुदमिव स्मितमेतत्स्मितमिव कुमुदं च धवलमिदम्॥१०॥

सा स्यादनन्वयाख्या यत्रैकं वस्त्वनन्यसदृशमिति।

स्वस्य स्वयमेव भवेदुपमानं चोपमेयं च ॥११॥

आनन्दसुन्दरमिदं त्वमिव त्वं सरसि नागनासोरु।

इयमियमिव तव च तनुः स्फारस्फुरदुरुरुचिप्रसरा॥१२॥

सा कल्पितोपमाख्या यैरुपमेयं विशेषणैर्युक्तम्।

तावद्भिस्तादृग्भिः स्यादुपमानं तथा यत्र॥१३॥

मुखमापूर्णकपोलं मृगमदलिखितार्धपत्रलेखं ते।

भाति लसत्सकलकलं स्फुटलाञ्छनमिन्दुबिम्बमिव॥१४॥

अनुपममेतद्वस्त्वित्युपमानं तद्विशेषणं चासत्।

संभाव्य सयद्यर्थं या क्रियते सोपमोत्पाद्या॥१५॥

कुमुददलदीधितीनां त्वक्संभूय च्यवेत यदि ताभ्यः।

इदमुपमीयेत तया सुतनोरस्याः स्तनावरणम्॥१६॥

सामान्यपदेन समं यत्र समस्येत तूपमानपदम्।

अन्तर्भूतेवार्था सात्र समासोपमा प्रथमा॥१७॥

मुखमिन्दुसुन्दरमिदं बिसकिसलयकोमले भुजालतिके।
जघनस्थली च सुन्दरि तव शैलशिलाविशालेयम्॥१८॥

पदमिदमन्यपदार्थे समस्यतेऽथोपमेयवचनेन।
यस्यां तु सा द्वितीया सर्वसमासेति संपूर्णा॥१९॥

शरदिन्दुसुन्दरमुखी कुवलयदलदीर्घलोचना सा मे।
दहति मनः कथमनिशं रम्भागर्भाभिरामोरूः ॥२०॥

उपमानपदेन समं यत्र समस्येत चोपमेयपदम्।
अन्यपदार्थे सोदितसामान्येवाभिज्ञेयान्या॥२१॥

नवविकसितकमलकरे कुवलयदललोचने सितांशुमुखि।
दहसि मनो यत्तत्किं रम्भागर्भोरु युक्तं ते॥२२॥

उपमानात्सामान्ये प्रत्ययमुत्पाद्य या प्रयुज्येत।
सा प्रत्ययोपमा स्यादन्तर्भूतेवशब्दार्था॥२३॥

पद्मायते मुखं ते नयनयुगं कुवलयायते यदिदम्।
कुमुदायते तथा स्मितमेवं शरदेव सुतनु त्वम्॥२४॥

मालोपमेति सेयं यत्रैकं वस्त्वनेकसामान्यम्।
उपमीयेतानेकैरुपमानैरेकसामान्यैः ॥२५॥

श्यामालतेव तन्वी चन्द्रकलेवातिनिर्मला सा मे।

हंसीव कलालापा चैतन्यं हरति निद्रेव॥२६॥

अर्थानामौपम्ये यत्र बहूनां भवेद्यथापूर्वम्।

उपमानमुत्तरेषां सेयं रशनोपमेत्यन्या॥२७॥

नभ इव विमलं सलिलं सलिलमिवानन्दकारि शशिबिम्बम्।

शशिबिम्बमिव लसद्युति तरुणीवदनं शरत्कुरुते ॥२८॥

क्रियतेऽर्थयोस्तथा या तदवयवानां तथैकदेशानाम्।

परमन्या ते भवतः समस्तविषयैकदेशिन्यौ॥२९॥

अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसन्ते।

भान्ति लता ललना इव पाणिभिरिव किसलयैः सपदि॥३०॥

कमलदलैरधरैरिव दशनैरिव केसरैर्विराजन्ते।

अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः॥३१॥

अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम्।

आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा॥३२॥

चम्पकतरुशिखरमिदं कुसुमसमूहच्छलेन मदनशिखी।

अयमुच्चैरारूढः पश्यति पथिकान्दिधक्षुरिव॥३३॥

सान्येत्युपमेयगतं यस्यां संभाव्यतेऽन्यदुपमेयम्।

उपमानप्रतिबद्धापरोपमानस्य तत्त्वेन॥३४॥

आपाण्डुगण्डपालीविरचितमृगनाभिपत्ररूपेण।

शशिशङ्कयेव पतितं लाञ्छनमस्या मुखे सुतनोः॥३५॥

यत्र विशिष्टे वस्तुनि सत्यसदारोप्यते समं तस्य।

वस्त्वन्तरमुपपत्त्या संभाव्यं सापरोत्प्रेक्षा॥३६॥

अतिघनकुङ्कुमरागा पुरः पताकेव दृश्यते संध्या।

उदयतटान्तरितस्य प्रथयत्यासन्नतां भानोः॥३७॥

यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा।

अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम्॥३८॥

साक्षादेव भवान्विष्णुर्भार्या लक्ष्मीरियं च ते।

नान्यद्भूतसृजा सृष्टं लोके मिथुनमीदृशम्॥३९॥

उपसर्जनोपमेयं कृत्वा तु समासमेतयोरुभयोः।

यत्तु प्रयुज्यते तद्रूपकमन्यत्समासोक्तम्॥४०॥

सावयवं निरवयवं संकीर्णं चेति भिद्यते भूयः।

द्वयमपि पुनर्द्विधैतत्समस्तविषयैकदेशितया॥४१॥

उभयस्यावयवानामन्योन्यं तद्वदेव यत्क्रियते।

तत्सावयवं त्रेधा सहजाहार्योभयैस्तैः स्यात्॥४२॥

ललनाः सरोरुहिण्यः कमलानि मुखानि केसरैर्दशनैः।
अधरैर्दलैश्च तासां नवबिसनालानि बाहुलताः॥४३॥

विकसितताराकुमुदे गगनसरस्यमलचन्द्रिकासलिले।
विलसति शशिकलहंसः प्रावृड्विपदपगमे सद्यः॥४४॥

अलिकुलकुन्तलभाराः सरसिजवदनाश्च चक्रवाककुचाः।
राजन्ति हंसवसनाः संप्रति वाणीविलासिन्यः॥४५॥

मुक्त्वावयवविवक्षां विधीयते यत्तु तत्तु निरवयवम्।
भवति चतुर्धा शुद्धं माला रशना परम्परितम्॥४६॥

शुद्धमिदं सा माला रशनाया वैपरीत्यमन्यदिदम्।
यस्मिन्नुपमानाभ्यां समस्यमुपमेयमन्यार्थे॥४७॥

कः पूरयेदशेषान्कामानुपशमितसकलसंतापः।
अखिलार्थिनां यदि त्वं न स्याः कल्पद्रुमो राजन्॥४८॥

कुसुमायुधपरमास्त्रं लावण्यमहोदधिर्गुणनिधानम्।
आनन्दमन्दिरमहो हृदि दयिता स्खलति मे शल्यम्॥४९॥

किसलयकरैर्लतानां करकमलैः कामिनां जगज्जयति।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः॥५०॥

स्मरशबरचापयष्टिर्जयति जनानन्दजलधिशशिलेखा।

लावण्यसलिलसिन्धुः सकलकलाकमलसरसीयम्॥ ५१॥

उपमेयस्य क्रियते तदवयवानां च साकमुपमानैः।

उभयेषां निरवयवैर्विज्ञेयं तदिति संकीर्णम्॥ ५२॥

लक्ष्मीस्त्वं मुखमिन्दुर्नयने नीलोत्पले करौ कमले।

केशाः केकिकलापो दशना अपि कुन्दकलिकास्ते॥५३॥

सुतनु सरो गगनमिदं हंसरवो मदनचापनिर्घोषः।

कुमुदवनं हरसितं कुवलयजालं दृशः सुदृशाम्॥५४॥

इन्द्रस्त्वं तव बाहू जयलक्ष्मीद्वारतोरणस्तम्भौ।

खङ्गः कृतान्तरसना जिह्वा च सरस्वती राजन्॥५५॥

उक्तं समस्तविषयं लक्षणमनयोस्तथैकदेशीदम्।

कमलाननैर्नलिन्यः केसरदशनैः स्मितं चक्रुः॥५६॥

अतिसाम्यादुपमेयं यस्यामसदेव कथ्यते सदपि।

उपमानमेव सदिति च विज्ञेयापह्नुतिः सेयम्॥५७॥

नवबिसकिसलयकोमलसकलावयवा विलासिनी सैषा।

आनन्दयति जनानां नयनानि सितांशुलेखेव॥५८॥

वस्तुनि यत्रैकस्मिन्ननेकविषयस्तु भवति संदेहः।
प्रतिपत्तुः सादृश्यादनिश्चयः संशयः स इति॥५९॥

किमिदं लीनालिकुलं कमलं किं वा मुखं सुनीलकचम्।
इति संशेते लोकस्त्वयि सुतनु सरोवतीर्णायाम्॥६०॥

उपमेये सदसंभवि विपरीतं वा तथोपमानेऽपि।
यत्र स निश्चयगर्भस्ततोऽपरो निश्चयान्तोऽन्यः॥६१॥

एतत्किं शशिबिम्बं न तदस्ति कथं कलङ्कमङ्केऽस्य।
किं वा वदनमिदं तत्कथमियमियती प्रभास्य स्यात्॥६२॥

किं पुनरिदं भवेदिति सौधतलालक्ष्यसकलदेहायाः।
वदनमिदं ते वरतनु विलोक्य संशेरते पथिकाः॥६३॥

किमयं हरिः कथं तद्गौरः किंवा हरः क्व सोऽस्य वृषः।
इति संशय्य भवन्तं नाम्ना निश्चिन्वते लोकाः॥६४॥

यत्रानेकत्रार्थे संदेहस्त्वेककारकत्वगतः।
स्यादेकत्वगतो वा सादृश्यात्संशयः सोऽन्यः ॥६५॥

गमनमधीतं हंसैस्त्वत्तः सुभगे त्वया नु हंसेभ्यः।
किं शशिनः प्रतिबिम्बं वदनं ते किं मुखस्य शशी॥६६॥

सकलसमानविशेषणमेकं यत्राभिधीयमानं सत्।
उपमानमेव गमयेदुपमेयं सा समासोक्तिः॥६७॥

फलमविकलमलघीयो लघुपरिणति जायतेऽस्य सुस्वादु।
प्रीणितसकलप्रणयिप्रणतस्य सदुन्नतेः सुतरोः ॥६८॥

तन्मतमिति यत्रोक्त्वा वक्तान्यमतेन सिद्धमुपमेयम्।
ब्रूयादथोपमानं तथा विशिष्टं स्वमतसिद्धम्॥६९॥

मदिरामदभरपाटलमलिकुलनीलालकालिधम्मिल्लम्।
तरुणीमुखमिति यदिदं कथयति लोकः समस्तोऽयम्॥७०॥

मन्येऽहमिन्दुरेषः स्फुटमुदयेऽरुणरुचिः स्थितैः पश्चात्।
उदयगिरौ छद्मपरैर्निशातमोभिर्गृहीत इव॥७१॥

यत्र ज्ञातादन्यत्पृष्टस्तत्त्वेन वक्ति तत्तुल्यम्।
कार्येणानन्यसमख्यातेन तदुत्तरं ज्ञेयम्॥७२॥

किं मरणं दारिद्र्यम् को व्याधिर्जीवितं दरिद्रस्य।
कः स्वर्गः सन्मित्रं सुकलत्रं सुप्रभुः सुसुतः॥७३॥

असमानविशेषणमपि यत्र समानेतिवृत्तमुपमेयम्।
उक्तेन गम्यते परमुपमानेनेति साऽन्योक्तिः॥७४॥

मुक्त्वा सलीलहंसं विकसितकमलोज्ज्वलं सरः सरसम्।
बकलुलितजलं पल्वलमभिलषसि सखे न हंसोऽसि॥७५॥

यत्रानुकम्प्यते सममुपमाने निन्द्यते वापि।
उपमेयमतिस्तोतुं दुरवस्थमिति प्रतीपं स्यात्॥७६॥

वदनमिदं सममिन्दोः सुन्दरमपि ते कथं चिरं न भवेत्।
मलिनयति यत्कपोलौ लोचनसलिलं हि कज्जलवत्॥७७॥

गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किं भद्रे।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि॥ ७८॥

धर्मिणमर्थविशेषं सामान्यं वाभिधाय तत्सिद्धये।
यत्र सधर्मिकमितरं न्यस्येत्सोऽर्थान्तरन्यासः॥७९॥

तुङ्गानामपि मेघाः शैलानामुपरि विदधते छायाम्।
उपकर्तुं हि समर्था भवन्ति महतां महीयांसः॥८०॥

सकलमिदं सुखदुःखं भवति यथावासनं तथाहीह।
रमयन्तितरां तरुणीर्नखक्षतादीनि रतिकलहे॥८१॥

पूर्ववदभिधायैकं विशेषसामान्ययोर्द्वितीयं तु।
तत्सिद्धयेऽभिदध्याद्विपरीतं यत्र सोऽन्योऽयम्॥८२॥

अभिसारिकाभिरभिहतनिबिडतमा निन्द्यते सितांशुरपि।

अनुकूलतया हि नृणां सकलं स्फुटमभिमतीभवति॥८३॥

हृदयेन निर्वृतानां भवति नृणां सर्वमेव निर्वृतये ।

इन्दुरपि तथाहि मनः खेदयतितरां प्रियाविरहे॥८४॥

सामान्यावप्यर्थौ स्फुटमुपमायाः स्वरूपतोऽपेतौ।

निर्दिश्येते यस्मिन्नुभयन्यासः स विज्ञेयः॥८५॥

सकलजगत्साधारणविभवा भुवि साधवोऽधुना विरलाः।

सन्ति कियन्तस्तरवः सुस्वादुसुगन्धिचारुफलाः॥८६॥

अर्थविशेषं पश्यन्नवगच्छेदन्यमेव तत्सदृशम्।

निःसंदेहं यस्मिन्प्रतिपत्ता भ्रान्तिमान्स इति॥८७॥

पालयति त्वयि वसुधां विविधाध्वरधूममालिनीः ककुभः।

पश्यन्तो दूयन्ते घनसमयाशङ्कया हंसाः॥८८॥

वस्तु प्रसिद्धमिति यद्विरुद्धमिति वास्य वचनमाक्षिप्य।

अन्यत्तथात्वसिद्ध्यै यत्र ब्रूयात्स आक्षेपः॥८९॥

जनयति संतापमसौ चन्द्रकलाकोमलापि मे चित्रम्।

अथवा किमत्र चित्रं दहति हिमानी हि भूमिरुहः॥९०॥

तव गणयामि गुणानहमलमथवासत्प्रलापिनीं धिङ्माम्।

कः खलु कुम्भैरम्भो मातुमलं जलनिधेरखिलम्॥९१॥

वक्तुमुपमेयमुत्तममुपमानं तज्जिगीषया यत्र।
तस्य विरोधीत्युक्त्या कल्प्येत प्रत्यनीकं तत्॥९२॥

यदि तव तया जिगीषोस्तद्वदनमहारि कान्तिसर्वस्वम्।
मम तत्र किमापतितं तपसि सितांशो यदेवं माम्॥९३॥

अर्थविशेषः पूर्वं यादृङ् न्यस्तो विवक्षितेतरयोः।
तादृशमन्यं न्यस्येद्यत्र पुनः सोऽत्र दृष्टान्तः॥९४॥

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि सितांशोर्विकसति कुमुदं कुमुद्वत्याः॥९५॥

लोकं लोलितकिसलयविषवनवातोऽपि मङ्क्षु मोहयति।
तापयतितरां तस्या ह्लदयं त्वद्गमनवार्तापि॥९६॥

यत्रैकविधावर्थौ जायेते यौ तयोरपूर्वस्य।
अभिधानं प्राग्भवतः सतोऽभिधीयेत तत्पूर्वम्॥९७॥

काले जलदकुलाकुलदशदिशि पूर्वं वियोगिनीवदनम्।
गलदविरलसलिलभरं पश्चादुपजायते गगनम्॥९८॥

सा हि सहोक्तिर्यस्यां प्रसिद्धदूराधिकक्रियो योऽर्थः।

तस्य समानक्रिय इति कथ्येतान्यः समं तेन॥९९॥

मधुपानोद्धतमधुकरमदकलकलकण्ठदीपितोत्कण्ठाः।

सपदि मधौ निजसदनं मनसा सह यान्त्यमी पथिकाः॥१००॥

यत्रैककर्तृका स्यादनेककर्माश्रिता क्रिया तत्र।

कथ्येतापरसहितं कर्मैकं सेयमन्या स्यात्॥१०१॥

स त्वां बिभर्ति ह्रदये गुरुभिरसंख्यैर्मनोरथैः सार्धम्।

ननु कोपनेऽवकाशः कथमपरस्या भवेत्तत्र॥१०२॥

सोऽयं समुच्चयः स्याद्यत्रानेकोऽर्थ एकसामान्यः।

अनिवादिर्द्रव्यादिः सत्युपमानोपमेयत्वे॥१०३॥

जालेन सरसि मीना हिंस्रैरेणा वने च वागुरया।

संसारे भूतसृजा स्नेहेन नराश्च बध्यन्ते॥१०४॥

अर्थक्रियया यस्मिन्नुपमानस्यैति साम्यमुपमेयम्।

तत्सामान्यगुणादिककारणया तद्भवेत्साम्यम्॥१०५॥

अभिसर रमणं किमिमां दिशमैन्द्रीमाकुलं विलोकयसि।

शशिनः करोति कार्यं सकलं मुखमेव ते मुग्धे॥१०६॥

सर्वाकारं यस्मिन्नुभयोरभिधातुमन्यथा साम्यम्।

उपमेयोत्कर्षकरं कुर्वीत विशेषमन्यत्तत्॥१०७॥

मृगं मृगाङ्कः सहजं कलङ्कं बिभर्ति तस्यास्तु मुखं कदाचित्।

आहार्यमेवं मृगनाभिपत्रमियानशेषेण तयोर्विशेषः॥१०८॥

वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम्।

कालान्तरानुभूतं वस्त्वन्तरमित्यदः स्मरणम्॥१०९॥

तव भवने पश्यन्तः स्थूलस्थूलेन्द्रनीलमणिमालाः।

भूभृन्नाथ मयूराः स्मरन्त्यमी कृष्णसर्पाणाम्॥११०॥

इत्यष्टमोऽध्यायः

## नवमोऽध्यायः

यत्रार्थधर्मनियमः प्रसिद्धिबाधाद्विपर्ययं याति।
कश्चित्क्वचिदतिलोकं स स्यादित्यतिशयस्तस्य॥१॥

पूर्वविशेषोत्प्रेक्षाविभावनातद्गुणाधिकविरोधाः।
विषमासंगतिपिहितव्याघातहेतवो भेदाः॥२॥

यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य।
प्रादुर्भावः पश्चाज्जनकस्य तु तद्भवेत्पूर्वम्॥३॥

जनमसुलभमभिलषतामादौ दन्दह्यते मनो यूनाम्।
गुरुरनिवारप्रसरः पश्चान्मदनानलो ज्वलति॥४॥

किञ्चिदवश्याधेयं यस्मिन्नभिधीयते निराधारम्।
तादृगुपलभ्यमानं विज्ञेयोऽसौ विशेष इति॥५॥

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः॥६॥

यत्रैकमनेकस्मिन्नाधारे वस्तु विद्यमानतया।
युगपदभिधीयतेऽसावत्रान्यः स्याद्विशेष इति॥७॥

हृदये चक्षुषि वाचि च तव सैवाभिनवयौवना वसति।

वयमत्र निरवकाशा विरम कृतं पादपतनेन॥८॥

यत्रान्यत्कुर्वाणो युगपत्कार्यान्तरं च कुर्वीत।
कर्तुमशक्यं कर्ता विज्ञेयोऽसौ विशेषोऽन्यः॥९॥

लिखितं बालमृगाक्ष्या मम मनसि तया शरीरमात्मीयम्।
स्फुटमात्मनो लिखन्त्या तिलकं विमले कपोलतले॥१०॥

यत्रातितथाभूते संभाव्येत क्रियाद्यसंभाव्यम्।
संभूतमतद्वति वा विज्ञेया सेयमुत्प्रेक्षा॥११॥

घनसमयसलिलधौते नभसि शरच्चन्द्रिका विसर्पन्ती।
अतिसान्द्रतयेह नृणां गात्राण्यनुलिम्पतीवेयम्॥१२॥

पल्लवितं चन्द्रकरैरखिलं नीलाश्मकुट्टिमोर्वीषु।
ताराप्रतिमाभिरिदं पुष्पितमवनीपतेः सौधम्॥१३॥

अन्यनिमित्तवशाद्यद्यथा भवेद्वस्तु तस्य तु तथात्वे।
हेत्वन्तरमतदीयं यत्रारोप्येत सान्येयम्॥१४॥

सरसि समुल्लसदम्भसि कादम्बवियोगदूयमानेव।
नलिनी जलप्रवेशं चकार वर्षागमे सद्यः॥१५॥

सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम्।
अभिधीयते यतः स्यात्तत्कारणमन्तरेणैव॥१६॥

निहतातुलतिमिरभरः स्फारस्फुरदुरुतरप्रभाप्रसरः।
शं वो दिनकृद्दिश्यादतैलपूरो जगद्दीपः॥१७॥

यस्यां तथा विकारस्तत्कारणमन्तरेण सुव्यक्तः।
प्रभवति वस्तुविशेषे विभावना सेयमन्या तु॥१८॥

जाता ते सखि सांप्रतमश्रमपरिमन्थरा गतिः किमियम्।
कस्मादभवदकस्मादियममधुमदालसा दृष्टिः।१९॥

यस्य यथात्वं लोके प्रसिद्धमर्थस्य विद्यते तस्मात्।
अन्यस्यापि तथात्वं यस्यामुच्येत सान्येयम्॥२०॥

स्फुटमपरं निद्रायाः सरसमचैतन्यकारणं पुंसाम्।
अपटलमान्ध्यनिमित्तं मदहेतुरनासवो लक्ष्मीः॥२१॥

यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणाम्।
संसर्गे नानात्वं न लक्ष्यते तद्गुणः स इति॥२२॥

नवधौतधवलवसनाश्चन्द्रिकया सान्द्रया तिरोगमिताः।
रमणभवनान्यशङ्कं सर्पन्त्यभिसारिकाः सपदि॥२३॥

असमानगुणं यस्मिन्नतिबहलगुणेन वस्तुना वस्तु।
संसृष्टं तद्गुणतां धत्तेऽन्यस्तद्गुणः स इति॥२४॥

कुब्जकमालापि कृता कार्तस्वरभास्वरे तथा कण्ठे।

एतत्प्रभानुलिप्ता चम्पकदामभ्रमं कुरुते॥२५॥

यत्रान्योन्यविरुद्धं विरुद्धबलवत्क्रियाप्रसिद्धं वा।

वस्तुद्वयमेकस्माज्जायत इति तद्भवेदधिकम्॥२६॥

मुञ्चति वारि पयोदो ज्वलन्तमनलं च यत्तदाश्चर्यम्।

उदपद्यत नीरनिधेर्विषममृतं चेति तच्चित्रम्॥२७॥

यत्राधारे सुमहत्याधेयमवस्थितं तनीयोऽपि।

अतिरिच्येत कथञ्चित्तदधिकमपरं परिज्ञेयम्॥२८॥

जगद्विशाले हृदि तस्य तन्वी प्रविश्य सास्ते स्म तथा यथा तत्

पर्याप्तमासीदखिलं न तस्यास्तत्रावकाशस्तु कुतोऽपरस्याः॥२९॥

यस्मिन्द्रव्यादीनां परस्परं सर्वथा विरुद्धानाम्।

एकत्रावस्थानं समकालं भवति स विरोधः॥३०॥

अस्य सजातीयानां विधीयमानस्य सन्ति चत्वारः।

भेदास्तन्नामानः पञ्च त्वन्ये तदन्येषाम्॥३१॥

जातिद्रव्यविरोधो न संभवत्येव तेन न षडेते।

अन्ये तु वक्ष्यमाणाः सन्ति विरोधास्तु चत्वारः॥३२॥

यत्रावश्यंभावी ययोः सजातीययोर्भवेदेकैः।

एकत्र विरोधवतोस्तयोरभावोऽयमन्यस्तु॥३३॥

अत्रेन्द्रनीलभित्तिषु गुहासु शैले सदा सुवेलाख्ये।
अन्योन्यानभिभूते तेजस्तमसी प्रवर्तेते॥३४॥

सत्यं त्वमेव सरलो जगति जराजनितकुब्जभावोऽपि।
ब्रह्मन्परमसि विमलो विततताध्वरधूममलिनोऽपि॥३५॥

बालमृगलोचनायाश्चरितमिदं चित्रमत्र यदसौ माम्।
जडयति संतापयति च दूरे हृदये च मे वसति॥३६॥

एकस्यामेव तनौ बिभर्ति युगपन्नरत्वसिंहत्वे।
मनुजत्ववराहत्वे तथैव यो विभुरसौ जयति॥३७॥

तेजस्विना गृहीतं मार्दवमुपयाति पश्य लोहमपि।
पात्रं तु महद्विहितं तरति तदन्यच्च तारयति॥३८॥

सा कोमलापि दलयति मम हृदयं पश्यतो दिशः सकलाः।
अभिनवकदम्बधूलीधूसरशुभ्रभ्रमद्भ्रमराः॥३९॥

वरतनु विरुद्धमेतत्तव चरितमदृष्टपूर्वमिह लोके।
मथ्नासि येन नितरामबलापि बलान्मनो यूनाम्॥४०॥

अविवेकितया स्थानं जातं न जलं न च स्थलं तस्याः।

अनुरज्य चलप्रकृतौ त्वय्यपि भर्ता यया मुक्तः॥४१॥

न मृदु न कठिनमिदं मे हतहृदयं पश्य मन्दपुण्यायाः।
यद्विरहानलतप्तं न विलयमुपयाति न च दार्ढ्यम्॥४२॥

नास्ते न याति हंसः पश्यन्गगनं घनश्यामम्।
चिरपरिचितां च बिसिनीं स्वयमुपभुक्तातिरिक्तरसाम्॥४३॥

न स्त्री न चायमस्त्री जातः कुलपांसनो जनो यत्र।
कथमिव तत्पातालं न यातु कुलमनवलम्बितया॥४४॥

कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः।
तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम्॥४५॥

अरिकरिकुम्भविदारणरुधिरारुणदारुणादतः खड्गात्।
वसुधाधिपते धवलं कान्तं च यशो बभूव तव॥४६॥

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम्।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥४७॥

विस्पष्टे समकालं कारणमन्यत्रकार्यमन्यत्र।
यस्यामुपलभ्येते विज्ञेयासंगतिः सेयम्॥४८॥

नवयौवनेन सुतनोरिन्दुकलाकोमलानि पूर्यन्ते।

अङ्गान्यसंगतानां यूनां हृदि वर्धते कामः॥४९॥

यत्रातिप्रबलतया गुणः समानाधिकरणमसमानम्।

अर्थान्तरं पिदध्यादाविर्भूतमपि तत्पिहितम्॥५०॥

प्रियतमवियोगजनिता कृशता कथमिव तवेयमङ्गेषु।

लसदिन्दुकलाकोमलकान्तिकलापेषु लक्ष्येत॥५१॥

अन्यैरप्रतिहतमपि कारणमुत्पादनं न कार्यस्य।

यस्मिन्नभिधीयेत व्याघातः स इति विज्ञेयः॥५२॥

यत्र सुरतप्रदीपा निष्कज्जलवर्तयो महामणयः।

माल्यस्यापि न गम्या हृतवसनवधूविसृष्टस्य॥५३॥

बलवति विकारहेतौ सत्यपि नैवोपगच्छति विकारम्।
यस्मिन्नर्थः स्थैर्यान्मन्तव्योऽसावहेतुरिति॥५४॥

रूक्षेऽपि पेशलेन प्रखलेऽप्यखलेन भूषिता भवता।
वसुधेयं वसुधाधिप मधुरगिरा परुषवचनेडपि॥ ५५॥

इति नवमोऽध्यायः

दशमोऽध्यायः।

यत्रैकमनेकार्थैर्वाक्यं रचितं पदैरनेकस्मिन्।

अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः॥१॥

अविशेषविरोधाधिकवक्रव्याजोक्त्यसंभवावयवाः।

तत्त्वविरोधाभासाविति भेदास्तस्य शुद्धस्य॥२॥

अविशेषः श्लेषोऽसौ विज्ञेयो यत्र वाक्यमेकस्मात्।

अर्थादन्यं गमयेदविशिष्टविशेषणोपेतम्॥३॥

शरदिन्दुसुन्दररुचं सुकुमारां सुरभिपरिमलामनिशम्।

निदधाति नाल्पपुण्यः कण्ठे नवमालिकां कान्ताम्॥४॥

यत्र विरुद्धविशेषणमवगमयेदन्यदर्थसामान्यम्।

प्रकान्तमतोऽन्यादृग्वाक्यश्लेषो विरोधोऽसौ॥५॥

संवर्धितविविधाधिककमलोऽप्यवदलितनालिकः सोऽभूत्।

सकलारिदाररसिकोऽप्यनभिमतपराङ्गनासङ्गः॥६॥

यत्राधिकमारब्धादसमानविशेषणं तथा वाक्यम्।

अर्थान्तरमवगमयेदधिकश्लेषः स विज्ञेयः॥७॥

प्रेम्णा निधाय मूर्धनि वक्रमपि बिभर्ति यः कलावन्तम्।

भूर्ति च वृषारूढः स एव परमेश्वरो जयति॥८॥

यत्रार्थादन्यरसस्तत्प्रतिबद्धश्च गम्यतेऽन्योऽर्थः।

वाक्येन सुप्रसिद्धो वक्रश्लेषः स विज्ञेयः॥९॥

आक्रम्य मध्यदेशं विदधत्संवाहनं तथाङ्गानाम्।

पतति करः काञ्च्यामपि तव निर्जितकामरूपस्य॥१०॥

यस्मिन्निन्दा स्तुतितो निन्दाया वा स्तुतिः प्रतीयेत।

अन्या विवक्षिताया व्याजश्लेषः स विज्ञेयः॥११॥

त्वया मदर्थे समुपेत्य दत्तमिदं यथा भोगवते शरीरम्।

तथास्य ते दूति कृतस्य शक्या प्रतिक्रियानेन न जन्मना मे॥१२॥

नो भीतं परलोकतो न गणितः सर्वः स्वकीयो जनो

मर्यादापि च लङ्घिता न च तथा मुक्ता न गोत्रस्थितिः।

भुक्ता साहसिकेन येन सहसा राज्ञां पुरः पश्यतां

सा मेदिन्यपरैः परं परिहृता सर्वैरगम्येति या॥१३॥

यत्र विवक्षितमर्थं पुष्यन्ती लौकिकी प्रसिद्धोक्तिः।

गम्येतान्या तस्मादुक्तिश्लेषः स विज्ञेयः॥१४॥

कलावतः संभृतमण्डलस्य यया हसन्त्यैव हृताशु लक्ष्मीः।

नृणामपाङ्गेन कृतश्च कामस्तस्याः करस्था ननु नालिकश्रीः॥१५॥

गम्येत प्रक्रान्तादसंभवत्तद्विशेषणोऽन्योऽर्थः।

वाक्येन सुप्रसिद्धः स ज्ञेयोऽसंभवश्लेषः॥१६॥

परिहृतभुजङ्गसङ्गः समनयनो न कुरुषे वृषं चाधः।

नन्वन्य एव दृष्टस्त्वमत्र परमेश्वरो जगति॥१७॥

यत्रावयवमुखस्थितसमुदायविशेषणं प्रधानार्थम्।

पुष्यन्गम्येतान्यः सोऽयं स्यादवयवश्लेषः॥१८॥

भुजयुगले बलभद्रः सकलजगल्लङ्घने तथा बलिजित्।
अक्रूरो हृदयेऽसौ राजाभूदर्जुनो यशसि॥१९॥

यस्मिन्वाक्येन तथा प्रक्रान्तस्य प्रसाधयत्तत्त्वम्।
गम्येतान्यद्वाच्यं तत्त्वश्लेषः स विज्ञेयः॥२०॥

नयने हि तरलतारे सुतनु कपोलौ च चन्द्रकान्तौ ते।
अधरोऽपि पद्मरागस्त्रिभुवनरत्नं ततो वदनम्॥२१॥

स इति विरोधाभासो यस्मिन्नर्थद्वयं पृथग्भूतम्।
अन्यद्वाक्यं गमयेदविरुद्धं सद्विरुद्धमिव॥२२॥

तव दक्षिणोऽपि वामो बलभद्रोऽपि प्रलम्ब एष भुजः।
दुर्योधनोऽपि राजन्युधिष्ठिरोऽस्तीत्यहो चित्रम्॥२३॥

एषां तु चतुर्णामपि संकीर्णानां स्युरगणिता भेदाः।
तन्नामानस्तेषां लक्षणमंशेषु संयोज्यम्॥२४॥

योगवशादेतेषां तिलतण्डुलवच्च दुग्धजलवच्च।
व्यक्ताव्यक्तांशत्वात्संकर उत्पद्यते द्वेधा॥२५॥

अभियुज्य लोलनयना साध्वसजनितोरुवेपथुस्वेदा।
अबलेव वैरिसेना नृप जन्ये भज्यते भवता॥२६॥

सन्नारीभरणो भवानपि न किं किं नाधिरूढो वृषं
किं वा नो भवता निकामविषमा दग्धाः पुरो विद्विषाम्।
इत्थं द्वौ परमेश्वराविह शिवस्त्वं चैकरूपस्थिती
तत्किं लोकविभो न जातु कुरुषे सङ्गं भुजङ्गैः सह॥२७॥
आलोकनं भवत्या जननयनानन्दनेन्दुकरजालम्।
हृदयाकर्षणपाशः स्मरतापप्रशमहिमसलिलम्॥२८॥

आदौ चुम्बति चन्द्रबिम्बविमलां लोलः कपोलस्थलीं
संप्राप्य प्रसरं क्रमेण कुरुते पीनस्तनास्फालनम्।
युष्मद्वैरिवधूजनस्य सततं कण्ठे लगत्युल्लसन्
किं वा यन्न करोत्यवारितरसः कामीव वाष्पः पतन्॥२९॥

**इति दशमोऽध्यायः**

## एकादशोऽध्यायः

परिहृत एव प्रायो दोषोऽर्थस्यान्यथोक्तिपरिहारात्।

अयमुच्यते ततोऽन्यस्तत्कारणमन्यथोक्तौ च ॥१॥

अपहेतुरप्रतीतो निरागमो बाधयन्नसंबद्धः।

ग्राम्यो विरसस्तद्वानतिमात्रश्चेति दुष्टोऽर्थः॥२॥

अपहेतुरसौ यस्मिन्केनचिदंशेन हेतुतामर्थः।

याति तथात्वे युक्त्या बलवत्या बाध्यते परया॥३॥

तव दिग्विजयारम्भे बलधूलीबहलतोयजनितेषु।

गगनस्थलेषु भानोश्चक्रमभूद्रथभराभिज्ञम्॥४॥

अर्थोऽयमप्रतीतो यः सन्नपि न प्रयुज्यते वृद्धैः।

शरदिव विभाति तन्वी विकसत्पुलकोत्करेयमिति॥५॥

आगमगम्यस्तमृते य उच्यतेऽर्थो निरागमः स इति।

सततं स राजसूयैरीजे विप्रोऽश्वमेधैश्च॥६॥

यः पूर्वमन्यथोक्तं तद्वक्तृकमेव बाधयेदर्थम्।

अर्थः स बाधयन्निति मृगाक्षि नेत्रे तवानुपमे॥७॥

प्रक्रान्तानुपयोगी प्राप्तो यस्तत्क्रमादसंबद्धः।

स इति गता ते कीर्तिर्बहुफेनं जलधिमुल्लङ्घ्य॥८॥

ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम्।

देशकुलजातिविद्यावित्तवयःस्थानपात्रेषु॥९॥

प्रागल्भ्यं कन्यानामव्याजो मुग्धता च वेश्यानाम्।

वैदग्ध्यं ग्राम्याणां कुलजानां धौर्त्यमित्यादि॥१०॥

एतद्विज्ञाय बुधैः परिहर्तव्यं महीयसो यत्नात्।

नहि सम्यग्ज्ञातुं शक्यमुदाहरणमात्रेण॥११॥

अन्यस्य यः प्रसङ्गे रसस्य निपतेद्रसः क्रमापेतः।

विरसोऽसौ स च शक्यः सम्यग्ज्ञातुं प्रबन्धेभ्यः॥१२॥

तव वनवासोऽनुचितः पितृमरणशुचं विमुञ्च किं तपसा।

सफलय यौवनमेतत्सममनुरक्तेन सुतनु मया॥१३॥

यः सावसरोऽपि रसो निरन्तरं नीयते प्रबन्धेषु।

अतिमहतीं वृद्धिमसौ तथैव वैरस्यमायाति॥१४॥

यो यस्याव्यभिचारी सगुणादिस्तद्विशेषणं क्रियते।

परिपूरयितुं छन्दो यत्र स तद्वानिति ज्ञेयः॥१५॥

क्व नु यास्यन्ति वराकास्तरुकुसुमरसैकलालसा मधुपाः।

भस्मीकृतं वनं तद्दवदहनेनातितीव्रेण॥१६॥

अतिदूरमतिक्रान्तो मात्रां लोकेऽतिमात्र इत्यर्थः।

तव विरहे हरिणाक्ष्याः प्लावयति जगन्ति नयनाम्बु॥१७॥

अत्यन्तमसंबद्धं परमतमभिधातुमन्यदश्लिष्टम्।

संगतमिति य   ब्रूयात्तत्रायुक्तिर्न दोषाय॥१८॥

किमिदमसंगतमस्मिन्नादावन्यत्तथान्यदन्ते च।

यत्नेनोप्ता माषाः स्फुटमेते कोद्रवा जाताः॥१९॥

अभिधेयस्यातथ्यं तदनुपपन्नं निकाममुपपन्नम्।

यत्र स्युर्वक्तृणामुन्मादो मौर्ख्यमुत्कण्ठा॥२०॥

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिबामि वियत्।

हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि॥२१॥

किं मां ब्रवीषि मूर्खं पश्येदं शिशिरमेव ननु तिमिरम्।

सुस्वादुरयं गन्धस्तमसा त्वेनं न पश्यामि॥२२॥

हे हंस देहि कान्तां सा मे भवता हृतेति किं मिथ्या।

ननु गतिरियं तदीया वाणी सैवेयमतिमधुरा॥२३॥

सामान्यशब्दभेदो वैषम्यमसंभवोऽप्रसिद्धिश्च।

इत्येते चत्वारो दोषा नासम्यगुपमायाः ॥२४॥

सामान्यशब्दभेदः सोऽयं यत्रापरत्र शक्येत।

योजयितुं नाभग्नं तत्सामान्याभिधायिपदम्॥२५॥

तल्लिङ्गकालकारकविभक्तिवचनान्यभावसद्भावात्।
उभयोः समानयोरिति तस्यां भिद्येत किञ्चित्तु॥२६॥

चन्द्रकलेव सुगौरो वात इव जगाम यः समुत्सृज्य।
दहतु शिखीव स कामं जीवयसि सुधेव मामालि॥२७॥

कुवलयदलमिव दीर्घे तव नयने इत्ययं तु सुव्यक्तः।
युक्त्या तावद्दोषो विद्वद्भिरपि प्रयुक्तश्च॥२८॥

अकृतविशेषणमेकं यत्स्यादुभयोस्तदन्यवैषम्यम्।
संभवति कल्पितायामुत्पाद्यायां च नान्यत्र॥२९॥

विपरीतरते सुतनोरायस्ताया विभाति मुखमस्याः।
श्रमवारिबिन्दुजालकलाञ्छितमिव कमलमुत्फुल्लम्॥३०॥

मुक्ताफलजालचितं यदीन्दुबिम्बं भवेत्ततस्तेन।
विपरीतरते सुतनोरुपमीयेताननं तस्याः॥३१॥

उपमानं यत्र स्यादसंभवत्तद्विशेषणं नियमात्।
संभूतमयद्यर्थं विज्ञेयोऽसंभवः स इति॥३२॥

सुतनुरियं विमलाम्बरलक्ष्योरुमृणालमूललालित्या।
अजलप्रकृतिदूरस्थितमित्रा गगननलिनीव॥३३॥

उपमानतया लोके वाच्यस्य न तादृशं प्रसिद्धं यत्।

क्रियते यत्र तदुत्कटसामान्यतयाप्रसिद्धिः सा॥३४॥

पद्मासनसंनिहितो भाति ब्रह्मेव चक्रवाकोऽयम्।

श्वपचश्यामं वन्दे हरिमिन्दुसितो बकोऽयमिति॥३५॥

शब्दार्थयोरिति निरूप्य विभक्तरूपान्दोषान्गुणांश्च निपुणो विसृजन्नसारम्।

सारं समाहितमनाः परमाददानः कुर्वीत काव्यमविनाशि यशोऽधिगन्तुम्॥३६॥

**इत्येकादशोऽध्यायः**

## द्वादशोऽध्यायः

ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।

लघु मृदु च नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः॥१॥

तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्।

उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात्॥२॥

शृङ्गारवीरकरुणा बीभत्सभयानकाद्भुता हास्यः।

रौद्रः शान्तः प्रेयानिति मन्तव्या रसाः सर्वे॥३॥

रसनाद्रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः।

निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः॥४॥

व्यवहारः पुंनार्योरन्योन्यं रक्तयो रतिप्रकृतिः।

शृङ्गारः स द्वेधा संभोगो विप्रलम्भश्च॥५॥

संभोगः संगतयोर्वियुक्तयोर्यश्च विप्रलम्भोऽसौ।

पुनरप्येष द्वेधा प्रच्छन्नश्च प्रकाशश्च॥६॥

रत्युपचारे चतुरस्तुङ्गकुलो रूपवानरुग्मानी।

अग्राम्योज्ज्वलवेषोऽनुल्बणचेष्टः स्थिरप्रकृतिः॥७॥

सुभगः कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्षः।

गम्यासु च विस्रम्भी तत्र स्यान्नायकः ख्यातः॥८॥

एवं स चतुर्धा स्यादनुकूलो दक्षिणः शठो धृष्टः।
तत्र प्रेम्णः स्थैर्यादनुकूलोऽनन्यरमणीकः॥९॥

खण्डयति न पूर्वस्यां सद्भावं गौरवं भयं प्रेम।
अभिजातोऽन्यमना अपि नार्यां यो दक्षिणः सोऽयम्॥१०॥

वक्ति प्रियमभ्यधिकं यः कुरुते विप्रियं तथा निभृतम्।
आचरति निरपराधवदसरलचेष्टः शठः स इति॥११॥

कृतविप्रियोऽप्यशङ्को यः स्यान्निर्भर्त्सतोऽपि न विलक्षः।
प्रतिपादितेऽपि दोषे वक्ति च मिथ्येत्यसौ धृष्टः॥१२॥

भक्तः संवृतमन्त्रो नर्मणि निपुणः शुचिः पटुवाग्मी।
चित्तज्ञः प्रतिभावांस्तस्य भवेन्नर्मसचिवस्तु॥१३॥

त्रिविधः स पीठमर्दः प्रथमोऽथ विटो विदूषकस्तदनु।
नायकगुणयुक्तोऽथ च तदनुचरः पीठमर्दोऽत्र॥१४॥

विट एकदेशविद्यो विदूषकः क्रीडनीयकप्रायः।
निजगुणयुक्तो मूर्खो हासकराकारवेषवचाः॥१५॥

आत्मन्यसर्वसक्तास्तिस्रो लज्जान्विता यथोक्तगुणाः।
सचिवगुणान्वितसख्यस्तस्य स्युर्नायिकाश्चेमाः॥१६॥

शुचिपौराचाररता चरित्रशरणार्जवक्षमायुक्ता।

आत्मीया तु त्रेधा मुग्धा मध्या प्रगल्भा च॥१७॥

मुग्धा तत्र नवोढा नवयौवनजनितमन्मथोत्साहा।
रतिनैपुणानभिज्ञा साध्वसपिहितानुरागा च॥ १८॥

तल्पे परिवृत्यास्ते सकम्पमालिङ्गनेऽङ्गमपहरति।
वदनं च चुम्बने सा पृष्टा बहुशोऽस्फुटं वक्ति॥ १९॥

अन्यां निषेवमाणे सा कुप्यति नायके ततस्तस्य।
रोदिति केवलमग्रे मृदुनोपायेन तुष्यति च॥२०॥

आरूढयौवनभरा मध्याविर्भूतमन्मथोत्साहा।
उद्भिन्नप्रागल्भ्या किञ्चिद्धृतसुरतचातुर्या॥२१॥

व्याप्रियते सायस्ता सुरते विशतीव नायकाङ्गेषु।
सुरतान्ते सानन्दा निमीलिताक्षी विमुह्यति च॥२२॥

कुप्यति तत्र सदोषे वक्रोक्त्या प्रतिभिनत्ति तं धीरा।
परुषवचोभिरधीरा मध्या सास्रैरुपालम्भैः॥२३॥

लब्धायतिः प्रगल्भा रतिकर्मणि पण्डिता विभुर्दक्षा।
आक्रान्तनायकमना निर्व्यूढविलासविस्तारा॥२४॥

सुरते निराकुलासौ द्रवतामिव याति नायकस्याङ्गे।
न च तत्र विवेक्तुमलं कोऽयं काहं किमेतदिति॥२५॥

तत्र कुपितापराधिनि संवृत्याकारमधिकमाद्रियते।
कोपमपह्नुत्यास्ते धीरा हि रहस्युदासीना॥२६॥

मध्या तु साधुवचनैस्तमीदृशं प्रतिभिनत्ति सोल्लुण्ठैः।
ताडयति मङ्क्ष्वधीरा कोपात्संतर्ज्य संतर्ज्य॥२७॥

ज्येष्ठकनिष्ठत्वेन तु पुनरपि मध्या द्विधा प्रगल्भा च।
मुग्धा त्वनन्यभेदा काव्येषु तथा प्रसिद्धत्वात्॥२८॥

दाक्षिण्यप्रेमभ्यां व्यवहारो नायकस्य काव्येषु।
दृष्टस्तयोरवश्यं सन्नपि न पुनर्भवो भेदः॥२९॥

परकीया तु द्वेधा कन्योढा चेति ते हि जायेते।
गुरुमदनार्ते नायकमालोक्याकर्ण्य वा सम्यक्॥३०॥

साक्षाच्चित्रे स्वप्ने स्याद्दर्शनमेवमिन्द्रजाले वा।
देशे काले भङ्ग्या साधु तदाकर्णनं च स्यात्॥३१॥

द्रष्टुं न संमुखीनं कन्या शक्नोति नायकं दृष्टा।
वक्तुं न च ब्रुवांणं वक्ति सखीं तं सखी चासौ॥३२॥

पश्यत्यवीक्षमाणं सुस्निग्धस्फारलोचना सततम्।
दूरात्पश्यति तस्मिन्नालिङ्गति बालमङ्कगतम्॥३३॥

अनिमित्तं च हसन्ती सादरमाभाषते सखीं किमपि।

रम्यं वा निजमङ्गं सव्यपदेशं प्रकाशयति॥३४॥

सख्या पर्यस्तं वा रचयत्यलकावतंसरशनादि।

चेष्टां करोति विविधामनुल्बणैरङ्गभङ्गैर्वा॥३५॥

अन्योढापि तथैतत्सर्वं कुरुतेऽनुरागमापन्ना।

नायकमभियुङ्क्ते सा प्रगल्भभावेन पुरतश्च॥३६॥

उद्भिन्नानन्दभरा प्रस्नुतजघनस्थलार्द्रवसना च।

निःष्पन्दतारनयना भवति तदालोकनादेव॥३७॥

कन्या पुनरभियुङ्क्ते न स्वयमेनं गतापि दुरवस्थाम्।

सुस्निग्धा तदवस्थां सखी तु तस्मै निवेदयति॥३८॥

सर्वाङ्गना तु वेश्या सम्यगसौ लिप्सते धनं कामात्।

निर्गुणगुणिनोस्तस्या न द्वेष्यो न प्रियः कश्चित्॥३९॥

गम्यं निरूप्य सा स्फुटमनुरक्तेवाभियुज्य रञ्जयति।

आकृष्टसकलसारं क्रमेण निष्कासयत्येनम्॥४०॥

द्वेधाभिसारिकाखण्डितात्वयोगाद्भवन्ति तास्तासु।

स्वीया स्वाधीनपतिः प्रोषितपतिका पुनर्द्वेधा॥४१॥

अभिसारिका तु सा या दूत्या दूतेन वा सहैका वा।

अभिसरति प्राणेशं कृतसंकेता यथास्थानम्॥४२॥

काञ्च्यादिरणत्कारं व्यक्तं लोके प्रयाति सर्वस्त्री।

वृष्टितमोज्योत्स्नादिच्छन्नं स्वीया परस्त्री च॥४३॥

यस्याः प्रेम निरन्तरमन्यासङ्गेन खण्डयेत्कान्तः।

सा खण्डितेति तस्याः कथाशरीराणि भूयांसि॥४४॥

यस्याः पतिरायत्तः क्रीडासु तया  समं रतौ मुदितः।

सा स्यात्स्वाधीनपती रतिमण्डनलालसासक्ता॥४५॥

सा स्यात्प्रोषितपतिका यस्या देशान्तरं पतिर्यातः।

नियतानियतावधिको यास्यति यात्येत्युपैष्यति च॥४६॥

इति कथितमशेषं लक्षणं नायकानामनुगतसचिवानां हीनमध्योत्तमानाम्।

अतिरसिकतयेदं नान्यथा जातु कुर्यात्कविरविहतचेताः साधुकाव्यं विधित्सन्॥४७॥

**इति द्वादशोऽध्यायः**

## त्रयोदशोऽध्यायः

अन्योन्यस्य सचित्तावनुभवतो नायकौ यदिद्धमुदौ।
आलोकनवचनादि स सर्वः संभोगशृङ्गारः॥१॥

तत्र भवन्ति स्त्रीणां दाक्षिण्यस्नेहसौकुमार्याणाम्।
अविरोधिन्यश्चेष्टा देशे काले च सर्वासाम्॥२॥

दयितस्य सखीमध्ये चेष्टां मधुरैर्वचोभिरुचितैस्ताः।
ललितैरङ्गविकारैः क्रीडन्त्यो वानुकुर्वन्ति ॥३॥

अनुकार्यं न तु नार्या यत्प्रेरणकर्म तत्परोक्षे सा।
अनुकुर्वती विजह्यान्माधुर्यं सौकुमार्यं च॥४॥

अपहारे वसनानां कुचकलशादिग्रहे रतान्ते च।
अन्तर्निहितानन्दा पुरुषेषु रुषेव वर्तन्ते॥५॥

समकालं निन्दन्ति त्रस्यन्ति हसन्त्यहेतु लज्जन्ति।
अस्यन्त्यालिङ्गन्ति च दयितान्भूतैरिवाविष्टाः॥६॥

समये त्वरावतीनामपदेषु विभूषणादिविन्यासः।
भवति गुणाय विभावितताात्पर्यस्मेरतादिरपि॥७॥

कुर्वन्ति प्रतिकूलं रहसि च यद्यत्प्रियं प्रति प्रमदाः।
तत्तद्गुणाय तासां भवति मनोभूप्रसादेन॥८॥

दृष्टा प्रियमायान्तं तन्मनसस्तेन संवदन्त्यो वा।
मन्मथजनितस्तम्भाः प्रतिहतचेष्टाश्च जायन्ते॥९॥

किमपि प्रियेण पृष्टास्तस्याथ ददत्यसंस्तुतस्येव।
साध्वससादितकण्ठ्यः स्खलितपदैरुत्तरं वाक्यैः॥१०॥

यत्किमपि रहस्यतमं कर्णे कथयेत्प्रियः सखीमध्ये।
शृण्वन्ति स्फारदृशस्तदुदितघनकण्टकस्वेदाः॥११॥

मदनव्याकुलमनसः सकलं तस्यार्थमनवगत्यैव।
हुंकारं तदपि मुहुः कुर्वन्त्यवधारयन्त्य इव॥१२॥

नवपरिणीता बध्वो यत्नादपनीय साध्वसं साम्ना।
नीता अपि विस्रम्भं रहः सुनिर्बन्धिभी रमणैः॥१३॥

प्रेर्य प्रेर्य सखीभिर्नीयन्ते वासवेश्म दयितस्य।
तत्संगमाभिलाषे भूयसि लज्जाहतप्रसरे॥१४॥

सुकुमाराः पुरुषाणामाराध्या योषितः सदा तल्पे।
तदनिच्छया प्रवृत्तः शृङ्गारं नाशयेन्मूर्खः॥१५॥

वाग्मी सामप्रवणश्चाटुभिराराधयेन्नारीम्।
तत्कामिनां महीयो यस्माच्छृङ्गारसर्वस्वम्॥१६॥

सुकविभिरभियुक्तैः सम्यगालोच्य तत्त्वं त्रिजगति जनताया यत्स्वरूपं निबद्धम्।

तदिदमिति समस्तं वीक्ष्य काव्येषु कुर्यात्कविरविरलकीर्तिप्राप्तये तद्वदेव॥१७॥

**इतित्रयोदशोऽध्यायः**

## चतुर्दशोऽध्यायः।

अथ विप्रलम्भनामा शृङ्गारोऽयं चतुर्विधो भवति।
प्रथमानुरागमानप्रवासकरुणात्मकत्वेन॥१॥

आलोकनादिमात्रप्ररूढगुरुरागयोरसंप्राप्तौ।
नायकयोर्या चेष्टा स प्रथमो विप्रलम्भ इति॥२॥

हिमसलिलचन्द्रचन्दनमृणालकदलीदलादि तत्रैतौ।
दुर्वारस्मरतापौ सेवेते निन्दतः क्षिपतः ॥३॥

आदावभिलाषः स्याच्चिन्ता तदनन्तरं ततः स्मरणम्।
तदनु च गुणसंकीर्तनमुद्वेगोऽथ प्रलापश्च॥४॥

उन्मादस्तदनु ततो व्याधिर्जडता ततस्ततो मरणम्।
इत्थमसंयुक्तानां रक्तानां दश दशा ज्ञेयाः॥५॥

अथ नायकोऽनुरक्तस्तस्यामर्जयति परिजनं तस्याः।
उद्दिश्य हेतुमन्यं साम्ना दानेन मानेन॥६॥

तस्य पुरतोऽथ कुर्वन्गृहीतवाक्यस्य नायिकाविषयाम्।
चिरमनुरागेण कथां स्वयमनुरागं प्रकाशयति॥७॥

तदभावे प्रव्रजिता मालाकारादियोषितो वापि।
उभयप्रत्ययितगिरः कर्मणि सम्यङ् नियुङ्क्ते च॥८॥

तद्द्वारेण निवेदितनिजभावो विदितनायिकाचित्तः।

त्वरयति तामुपचारैः स्वावस्थासूचकैर्लेखैः॥९॥

सिद्धां च तां विविक्ते दृष्ट्वाथ कलाभिरिन्द्रजालैर्वा।

योगैरसकृत्क्रमशो विस्मापयति प्रसङ्गेषु॥१०॥

मन्येत यदा नेयं कथमपि लभ्येत नायिका नाथात्।

क्षीणसमस्तोपायः कन्यां स तदैति साधयति॥११॥

नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्याः।

कर्तव्यतयान्येषां न च तदुपायोऽभिधातव्यः॥१२॥

किन्तु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति।

आराधयितुं विदुषस्तेन न दोषः कवेरत्र॥१३॥

सर्वत एवात्मानं गोपायेदिति सुदारुणावस्थः।

आत्मानं रक्षिष्यन्प्रवर्तते नायकोऽप्यत्र॥१४॥

मानः स नायके यं विकारमायाति नायिका सेर्ष्या।

उद्दिश्य नायिकान्तरसंबन्धसमुद्भवं दोषम्॥१५॥

गमनं ज्यायान्दोषः प्रतियोषिति मध्यमस्तथालापः।

आलोकनं कनीयान्मध्यो ज्यायान्स्वयं दृष्टः॥१६॥

वसनादि नायकस्थं तदीयमार्द्रक्षतं च तस्याङ्गम्।
दोषस्य तथा गमकं गोत्रस्खलनं सखीवचनम्॥१७॥

देशं कालं पात्रं प्रसङ्गमवगमकमेत्य सविशिष्टम्।
जनयति कोपमसाध्यं सुखसाध्यं दुःखसाध्यं वा॥१८॥

ज्वलदुज्ज्वलप्रदीपं कुसुमोत्करधूपसुरभि वासगृहम्।
सौधतलं च सचन्द्रिकमुद्यानं सुरभिकुसुमभरम्॥१९॥

इति देशा ज्यायांसो मधुरजनी स्मरमहोदयः कालः।
पात्रं तु नायकौ तौ ज्यायो मध्याधमावुक्तौ॥२०॥

सकलसखीपरिवृतता रत्यभिमुखता च तत्प्रशंसा च।
जायेत नायिकायां यत्र ज्यायान्प्रसङ्गोऽसौ॥२१॥

परिहारो वसनादावन्यस्मादागमोऽन्यदिदमिति वा।
परिहर्तुं कृतमस्मिन्न लक्ष्यते नायिकां रमयेत्॥ २२॥

तदनु त्वत्कृतमिदमिति परिहारः पूर्वमेव वा सुरतम्।
शब्दान्तरनिष्पत्तिर्गोत्रस्खलने तु केलिर्वा॥२३॥

अभियोज्यायां मयि वा कुपितेयमनेन हेतुना तेन।
वक्ति सखी ते मिथ्या किलेति तद्वचसि परिहारः॥२४॥

ज्यायोभिः सह दोषो ज्यायाञ्जनयत्यसाध्यमतिकोपम्।
तस्मान्म्रियते सद्यो मनस्विनी त्यजति वा पुरुषम्॥२५॥

दोषस्य सहायानामालोच्य बलाबलं समेतानाम्।
बुध्येत कोपमस्याः सुखसाध्यं कृच्छ्रसाध्यं वा॥२६॥

साम प्रदानभैदौ प्रणतिरुपेक्षा प्रसङ्गविभ्रंशः।
अत्रैते षडुपाया दण्डस्त्विह हन्ति शृङ्गारम्॥२७॥

दासोऽस्मि पालनीयस्तवैव धीरा बहुक्षमा त्वं च।
अहमेव दुर्जनोऽस्मिन्नित्यादि स्तुतिवचः साम॥२८॥

कालेऽलंकारादीन्दद्यादुद्दिश्य कारणं त्वन्यत्।
बन्धुमहादिकमिति यत्तद्दानं साधु लुब्धासु॥२९॥

तस्या गृहीतवाक्यं परिजनमाराध्य दानसंमानैः।
तेन सदोषः कोपे तां बोधयतीत्ययं भेदः ॥३०॥

दैन्येन पादपतनं प्रणतिरुपेक्षावधीरणं तस्याः।
सहसात्युत्सवयोगो भ्रंशः कोपप्रसङ्गस्य॥३१॥

मृदुरत्र यथा पूर्वं सर्वेषु यथोत्तरं तथा बलवत्।
साध्येत यो न मृदुना बलवांस्तत्र प्रयोक्तव्यः॥३२॥

यास्यति याति गतो यत्परदेशं नायकः प्रवासोऽसौ।

एष्यत्येत्यायातो यथर्त्ववस्थोऽन्यथा च गृहान्॥३३॥

करुणः स विप्रलम्भो यत्रान्यतरो म्रियते नायकयोः।

यदि वा मृतकल्पः स्यात्तत्रान्यस्तद्गतं प्रलपेत्। ३४॥

सर्वेष्वेषु जनः स्यात्स्रस्तावयवो विचेतनो ग्लानः।

अच्छिन्ननयनसलिलः सततं दीर्घोष्णनिःश्वासः॥३५॥

शृङ्गाराभासः स तु यत्र विरक्तेऽपि जायते रक्तः।

एकस्मिन्नपरोऽसौ नाभाष्येषु प्रयोक्तव्यः॥३६॥

इह वैदर्भी रीतिः पाञ्चाली वा विचार्य रचनीया।

मधुरालिते कविना कार्ये वृत्ती तु शृङ्गारे॥३७॥

अनुसरति रसानां रस्यतामस्य नान्यः सकलमिदमनेन व्याप्तमाबालवृद्धम्।

तदिति विरचनीयः सम्यगेष प्रयत्नाद्भवति विरसमेवानेन हीनं हि काव्यम्॥३८॥

**इति चतुर्दशोऽध्यायः**

## पञ्चदशोध्यायः।

उत्साहात्मा वीरः स त्रेधा युद्धधर्मदानेषु।

विषयेषु भवति तस्मिन्नक्षोभो नायकः ख्यातः॥१॥

नयविनयबलपराक्रमगाम्भीर्यैश्वैर्योदार्यशोर्यशौटीर्यैश्वः।

युक्तोऽनुरक्तलोको निर्व्यूढभरो महारम्भः॥२॥

करुणः शोकप्रकृतिः शोकश्च भवेद्विपत्तितः प्राप्तेः।

इष्टस्यानिष्टस्य च विधिविहतो नायकस्तत्र॥३॥

अच्छिन्ननयनसलिलप्रलापवैवर्ण्यमोहनिर्वेदाः।

क्षितिचेष्टनपरिदेवनविधिनिन्दाश्चेति करुणे स्युः॥४॥

भवति जुगुप्साप्रकृतिर्वीभत्सः सा तु दर्शनाच्छ्रवणात्।

संकीर्तनात्तथेन्द्रियविषयाणामत्यहृद्यानाम्॥५॥

हृल्लेखननिष्ठीवनमुखकूणनसर्वगात्रसंहाराः।

उद्वेगः सन्त्यस्मिन्गाम्भीर्यान्नोत्तमानां तु॥६॥

संभवति भयप्रकृतिर्भयानको भयमतीव घोरेभ्यः।

शब्दादिभ्यस्तस्य च नीचस्त्रीबालनायकता॥७॥

दिक्प्रेक्षणमुखशोषणवैवर्ण्यखेदगद्गदत्रासाः।

करचरणकम्पसंभ्रममोहाश्च भयानके सन्ति॥८॥

स्यादेष विस्मयात्मा रसोऽद्भुतो विस्मयोऽप्यसंभाव्यात्।
स्वयमनुभूतादर्थादनुभूयान्येन वा कथितात्॥९॥

नयनविकासो वाष्पः पुलकः खेदोऽनिमेषनयनत्वम्।
संभ्रमगद्गदवाणीसाधुवचांस्युत्तमे सन्ति॥१०॥

हास्यो हासप्रकृतिर्हासो विकृताङ्गवेशचेष्टाभ्यः।
भवति परस्थाभ्यः स च भूम्न स्त्रीनीचबालगतः॥११॥

नयनकपोलविकासी किंचिल्लक्ष्यद्विजोऽप्यसौ महताम्।
मध्यानां विवृतास्यः सशब्दबाप्पश्च नीचानाम्॥१२॥

रौद्रः क्रोधप्रकृतिः क्रोधोऽरिकृतात्पराभवाद्भवति।
तत्र सुदारुणचेष्टः सामर्षो नायकोऽत्युग्रः॥१३॥

तत्र निजांसस्फालनविषमभ्रुकुटीक्षणायुधोत्क्षेपाः।
सन्ति स्वशक्तिशंसाप्रतिपक्षाक्षेपदलनानि॥१४॥

सम्यग्ज्ञानप्रकृतिः शान्तो विगतेच्छनायको भवति।
सम्यग्ज्ञानं विषये तमसो रागस्य चापगमात्॥१५॥

जन्मजरामरणादित्रासो वैरस्यवासना विषये।
सुखदुःखयोरनिच्छाद्वेषाविति तत्र जायन्ते॥१६॥

स्नेहप्रकृतिः प्रेयान्संगतशीलार्यनायको भवति।

स्नेहस्तु साहचर्यात्प्रकृतेरुपचारसंबन्धात्॥१७॥

निर्व्याजमनोवृत्तिः सनर्मसद्भावपेशलालापाः।

अन्योन्यं प्रति सुहृदोर्व्यवहारोऽयं मतस्तत्र॥१८॥

प्रस्यन्दिप्रमदाश्रुः सुस्निग्धस्फारलोचनालोकः।

आर्द्रान्तःकरणतया स्नेहपदे भवति सर्वत्र॥१९॥

वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।

लाटीयागौडीये रौद्रे कुर्याद्यथौचित्यम्॥२०॥

एते रसा रसवतो रमयन्ति पुंसः  सम्यग्विभज्य रचिताश्चतुरेण चारु।

यस्मादिमाननधिगम्य न सर्वरम्यं काव्यं विधातुमलमत्र तदाद्रियेत॥२१॥

**इति पञ्चदशोऽध्यायः**

षोडशोऽध्यायः

जगति चतुर्वर्ग इति ख्यातिर्धर्मार्थकाममोक्षाणाम्।

सम्यक्तानभिदध्याद्रससंमिश्रान्प्रबन्धेषु॥१॥

सन्ति द्विधा प्रबन्धाः काव्यकथाख्यायिकादयः काव्ये।

उत्पाद्यानुत्पाद्या महल्लघुत्वेन भूयोऽपि॥२॥

तत्रोत्पाद्या येषां शरीरमुत्पादयेत्कविः सकलम्।

कल्पितयुक्तोत्पंत्ति नायकमपि कुत्रचित्कुर्यात्॥३॥

पञ्जरमितिहासादिप्रसिद्धमखिलं तदेकदेशं वा।

परिपूरयेत्स्ववाचा यत्र कविस्ते त्वनुत्पाद्याः ॥४॥

तत्र महान्तो येषु च विततेष्वभिधीयते चतुर्वर्गः।

सर्वे रसाः क्रियन्ते काव्यस्थानानि सर्वाणि॥५॥

ते लघवो विज्ञेया येष्वन्यतमो भवेच्चतुर्वर्गात्।

असमग्रानेकरसा ये च समग्रैकरसयुक्ताः॥६॥

तत्रोत्पाद्ये पूर्वं सन्नगरीवर्णनं महाकाव्ये।

कुर्वीत तदनु तस्यां नायकवंशप्रशंसां च ॥७॥

तत्र त्रिवर्गसक्तं समिद्धशक्तित्रयं च सर्वगुणम्।

रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यस्येत्॥८॥

विधिवत्परिपालयतः सकलं राज्यं च राजवृत्तं च।

तस्य कदाचिदुपेतं शरदादिं वर्णयेत्समयम्॥९॥

स्वार्थं मित्रार्थं वा धर्मादिं साधयिष्यतस्तस्य।

कुल्यादिष्वन्यतमं प्रतिपक्षं वर्णयेद्गुणिनम्॥१०॥

खचरात्तद्दूताद्वा कुतोऽपि वा श्रृण्वतोऽरिकार्याणि।

कुर्वीत सदसि राज्ञां क्षोभं क्रोधेद्धचित्तगिराम्॥११॥

संमन्त्र्य समं सचिवैर्निश्चित्य च दण्डसाध्यतां शत्रोः।

तं दापयेत्प्रयाणं दूतं वा प्रेषयेन्मुखरम्॥१२॥

अथनायकप्रमाणे नागरिकक्षोभजनपदाद्रिनदीः।

अटवीकाननसरसीमरुजलौघद्वीपभुवनानि॥१३॥

स्कन्धावारनिवेशं क्रीडां यूनां यथायथं तेषु।

रव्यस्तमयं संध्यां संतमसमथोदयं शशिनः॥१४॥

रजनीं च तत्र यूनां समाजसंगीतपानशृङ्गारान्।

इति वर्णयेत्प्रसङ्गात्कथां च भूयो निबध्नीयात्॥१५॥

प्रतिनायकमपि तद्वत्तदभिमुखममृष्यमाणमायान्तम्।

अभिदध्यात्कार्यवशान्नगरीरोधस्थितं वापि॥१६॥

योद्धव्यं प्रातरिति प्रबन्धमधुपीतिं निशि कलत्रेभ्यः।

स्ववधं विशङ्कमानान्संदेशान्दापयेत्सुभटान्॥१७॥

संनह्य कृतव्यूहं सविस्मयं युध्यमानयोरुभयोः।

कृच्छ्रेण साधु कुर्यादभ्युदयं नायकस्यान्ते॥१८॥

सर्गाभिधानि चास्मिन्नवान्तरप्रकरणानि कुर्वीत।

संधीनपि संश्लिष्टांस्तेषामन्योन्यसंबन्धात्॥१९॥

श्लोकैर्महाकथायामिष्टान्देवान्गुरून्नमस्कृत्य।

संक्षेपेण निजं कुलमभिदध्यात्स्वं च कर्तृतया॥२०॥

सानुप्रासेन ततो भूयो लघ्वक्षरेण गद्येन।

रचयेत्कथाशरीरं पुरेव पुरवर्णकप्रभृतीन्॥२१॥

आदौ कथान्तरं वा तस्यां न्यस्येत्प्रपञ्चितं सम्यक्।

लघुतावत्संधानं प्रकान्तकथावताराय॥२२॥

कन्यालाभफलां वा सम्यग्विन्यस्तसकलशृङ्गाराम्।

इति संस्कृतेन कुर्यात्कथामगद्येन चान्येन॥२३॥

पूर्ववदेव नमस्कृतदेवगुरुर्नोत्सहेत्स्थितेष्वेषु।

काव्यं कर्तुमिति कवीञ् शंसेदाख्यायिकायां तु॥२४॥

तदनु नृपे वा भक्तिं परगुणसंकीर्तनेऽथवा व्यसनम्।

अन्यद्वा तत्करणे कारणमक्लिष्टमभिदध्यात्॥२५॥

अथ तेन कथैव यथा रचनीयाख्यायिकापि गद्येन।

निजवंशं स्वं चास्यामभिदध्यान्न त्वगद्येन।२६॥

कुर्यादत्रोच्छवासान्सर्गवदेषां मुखेष्वनाद्यानाम्।

द्वे द्वे चार्ये श्लिष्टे सामान्यार्थे तदर्थाय॥२७॥

संशयशंसावसरे भवतो भूतस्य वा परोक्षस्य।

अर्थस्य भाविनस्तु प्रत्यक्षस्यापि निश्चितये॥२८॥

संशयितुः प्रत्यक्षं स्वावसरेणैव पाठयेत्कंचित्।

अन्योक्तिसमासोक्तिश्लेषाणामेकमुभयं वा॥२९॥

तत्र च्छन्दः कुर्यादार्यापरवक्त्रपुष्पिताग्राणाम्।

अन्यतमं वस्तुवशादथवान्यन्मालिनीप्रायम्॥३०॥

साभिप्रायं किंचिद्विरुद्धमिव वस्तु सत्प्रसङ्गेन।

अन्तः कथाश्च कुर्यात्त्रिष्वप्येषु प्रबन्धेषु॥३१॥

कुर्यादभ्युदयान्तं राज्यभ्रंशादि नायकस्यापि।

अभिदध्यादेषु तथा मोक्षं च मुनिप्रसङ्गेन॥३२॥

कुर्यात्क्षुद्रे काव्ये खण्डकथायां च नायकं सुखिनम्।

अपाद्गतं च भूयो द्विजसेवकसार्थवाहादिम्॥३३॥

अत्र रसं करुणं वा कुर्यादथवा प्रवासशृङ्गारम्।

प्रथमानुरागमथवा पुनरन्ते नायकाभ्युदयम्॥३४॥

नैतदनुत्पाद्येषु तु तत्र ह्यभिधीयते यथावृत्तम्।
अल्पेषु महत्सु च वा तद्विषयो नायमुपदेशः॥३५॥

अन्यद्वर्णकमात्रं प्रशस्तिकुलकादिनाटकाद्यन्यत्।
काव्यं तद्वहुभाषं विचित्रमन्यत्र चाभिहितम्॥३६॥

कुलशैलाम्बुनिधीनां न ब्रूयाल्लङ्घनं मनुष्येण।
आत्मीययैव शक्त्या सप्तद्वीपावनिक्रमणम्॥ ३७॥

येऽपि तु लङ्घितवन्तो भरतप्राया कुलाचलाम्बुनिधीन्।
तेषां सुरादिमुख्यैः सङ्गादासन्विमानानि॥३८॥

शक्तिश्च न जात्वैषामसुरादिवधेऽधिका सुरादिभ्यः।
आसीत्ते हि सहाया नीयन्ते स्मामरैः समिति॥३९॥

दारिद्र्यव्याधिजराशीतोष्णाद्युद्भवानि दुःखानि।
बीभत्सं च विदध्यादन्यत्र न भारताद्वर्षात्॥४०॥

वर्षेष्वन्येषु यतो मणिकनकमयी मही हितं सुलभम्।
विगताधिव्याधिजराद्वन्द्वा लक्षायुषो लोकाः॥४१॥

जयति जनमनिष्टादुद्धरन्ती भवानी जयति निजविभूतिव्याप्तविश्वो मुरारिः।
जयति च गजवक्त्रः सोऽत्र यस्य प्रसादादुपशमति समस्तो विघ्नवर्गोपसर्गः॥४२॥

**इति षोडशोऽध्यायः**

समाप्तोऽयं ग्रन्थः।